कु ३

काव्यरसकौमाधार

॥८३॥

पुस्तकमिदं पाठकोपनामक
रामचंद्रशर्मणः।पत्राणि।।३६२

६५००

मार्तंडोयमुदेतीति केन पशुना लोके शशांकीकृतः। अत्र विरहिजनवाक्येनायं शशांकोऽपितु
सन्हि ह्नो मार्तंड इति तु छायामात्रमपह्नुतेर्न त्वपह्नुत्यलंकारः तज्ज्ञानस्य दोषविशेषजन्य
त्वेनानाहार्यत्वात् किंतु भ्रांतिमदलंकार एव। अत्रालिर्मृगो वा नेत्रं चापत्र किंचिद्विभासते।
अरविंदमृगांको वा मुखं वेदं मृगीदृशः। अत्र मुखमरविंदं वेति कविनिष्ठाहार्यसंशये मुख
निषेधसामानाधिकरण्येन विषयीभूतेऽरविंदतादात्म्यस्य निश्चयविषयत्वाभावासं
ग्रह॥ न चात्र विषयनिषेधस्यापदार्थत्वं शक्यं। शब्दार्थत्वात्। एतत्तु कुवलयानंदाख्ये सं
दर्भे अप्पदीक्षितैरपह्नुतिप्रभेदकथनप्रस्तावे पर्यस्तापह्नुत्याख्यभेदं निरूपयद्भिरभि
हितं अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिस्तु सः। नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसी
मुखमिति। अत्र चिंत्यते। नायमपह्नुतेर्भेदो युक्तः। अपह्नुतिसामान्यलक्षणा

र०गं०
१८३

183

नाक्रांतत्वात्तथाहि। प्रकृतं यन्निषिध्यान्यत्साध्यते सात्वपह्नुतिः। उपमेयमसंकृत्वोपमानं
संत्यतु यापत्स्याप्यैते सापह्नुतिरिति काव्यप्रकाशोक्तलक्षणं वहि भीवस्त्वावत्स्कुट एव एवं
विषयांकृवेवस्त्वंतरमप्रतीत्यावपह्नुतिरित्यलंकारसर्वस्वोक्तलक्षणमपि नात्रप्रवर्त्तते। प्र
कृतस्य निषेधेन पदतत्त्वप्रकल्पनं। सा स्यादपह्नुतिर्वाक्यभेदाऽभेदवती द्विधेति चित्रमीमां
सागतल्लिखितमपि लक्षणमिह तथैव। तस्मात्रायं सुधांशुः किंतर्हि सुधांशुः प्रेयसीमुख
मित्यत्र हृद्यारोपरूपकमेव भवितुमर्हतीति नापह्नुतिः उपमेयतोपमानतावच्छेदकयोः सामाना
धिकरण्यप्रतीतिः प्रत्यहंभानात्। तदुक्तं विमर्शिन्यां। न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते
अत्र विषयस्य निषेधपूर्वं ब्रह्मस्वविषयेऽप्यारोप्यमाणत्वादारोपरूपकमेव नापह्नुतिरिति।
यदि च प्राचीनमतमनुपेक्ष्यालंकाररत्नाकरेणेवमप्यप्ययं प्रकारोऽपह्नुतिमध्ये गणितस्तदा सु

श्री०
१८३

च्यत्तेतदान्त्राहार्यतानूप्यनिश्चयस्यसमानत्वाद्रूपकभेदएवाह्कुतिरित्युपमुच्यत्तोनिरस्तत्तां
चप्राचीनमुखदाक्षिण्यं।एवमपिचित्रमीमांसागतेत्वन्निर्मितायह्कुतिलक्षणस्यात्राव्याप्ति
स्थितैव।अपिचयदिनायंसुधांशुःकिंतर्हिसुधांशुप्रेपलीमुखमितित्रपर्यस्तापह्नुतिरित्युच्य
तेतदात्तस्यामेवत्वत्कृतचित्रमीमांसागतस्यविवाविशिष्टनिर्दिष्टेविषयेयघनिह्कुतेउपरं
जकतामेतिविषयीरूपकंतदेतिरूपकलक्षणस्यातिव्याप्तिर्वज्रलेपायितास्यात् विषयि
णानिह्नवेपिविषयस्यानिह्नुतत्वात्।अथापिचित्रमीमांसायांप्राचीनमतानुसारेणरूपकल
क्षणंकुवलयानंदेचरत्नाकराधनुसारेणापह्नुतित्वोक्तिरितिपथाकथंचित्सामंजस्यंविधे
यमितिरिक्त।अनस्वेजोवृनरदानवुर्षतथैवहर्षजतपनजनेषु।दारिद्र्यधर्मक्षयणक्षमा
र्यधाराधरेनैवधराधिनाथः।सावयवारोपयमयह्कुतिःआरोपमात्रापापत्वेपरंपरितारा

र·गं·
१८४
184

याप्येषा संभवति। यथा। मनुष्य इति मूढेन खलः केन निगद्यते। अयं तु सज्जनांभोजवनमत्तमतंगजः
अस्याश्च ध्वनिः यथा। दर्पितेरदनत्विषां मिषाद्धियि ते मी विलसंति केसराः। अपि चालकवेषधारि
णो मकरंदस्पृहयालवो लयः अत्र नैते तारदत्विषः किंतु किंजल्कपरंपराः न चैते अलकाः अपि
तु अलय इति पूर्वोत्तरार्धाभ्यां द्वे अपह्नुती तावत्साकंक्षे नैव निवोढिते ताभ्यां च न त्वं नारी किंतु
कमलिनीति तत्तीयापह्नुतिर्व्यंजनव्यापारेण प्राधान्येन निवेद्यते। तत्संवंधिवस्तुनिषेधारोपयोः
जन्निषेधारोपनिवेदकत्वस्यन्याय्यत्वात् तत्तुल्ययोगितानुगुणतया स्थिता। यत्त्वप्पदीक्षितैरप
ह्नुतिध्वनावुक्तं। त्वं दोले खेकोतूहलतरलतन्थ्वी विरचिते विधापेका चकोरश्चयति सुपर्णे सु
तमपि अपि त्वित्वधसाणिस्त्वरितमपमृत्येतरपराकरैयौष्यंवा यंमकरमुपरिष्टाच्चलिखतिरसा श्री०
दावयह्नुतिध्वनिरुदाहर्तव्यः अत्र हि चक्रसुपर्णलेखनेन नायं साधारणः पुरुषः किंतु पुरु १८४

रीकाक्ष इति कयापि विध्यं जितं अमपातु तस्यापि तादृशं रूपं न संभवतीत्याशयेन नायं पुंडरीकाक्षो
पि किंतु मन्मथ इति तद्भयमयमयमज्ञ्यपुष्पसायकमकरध्वजलांछनेन व्यंजितमिति। तदेतदापात
रमणीयं। यन्नावदुच्यते चक्रस्तु वर्णोल्लेखनेन नायं साधारणः पुरुषः किंतु पुंडरीकाक्ष इति कयापि वि
ध्यं जितमिति तत्रायमाकूतं द्वौ भागौ· उपमेयनिषेध उपमानारोपश्चेति तयोस्तावदुपमानारोपभागः
पुंडरीकाक्षोपमित्यं कारश्चक्रस्तुपर्णोल्लेखनेन व्यङ्गः शक्यः चक्रस्तुपरायोस्तत्संबंधित्वात्· न तु
नायं साधारणः पुरुष इत्युपमेयनिषेधभागोपि व्यंजकं स्यात् तादृशनिषेधव्यंजने सामर्थ्याभावात्
नाप्यनुभवसिद्धः सः पेन तद्व्यंजनोपायो गवेष्यतनापि गवेष्यमाणोपि तद्व्यंजनोपायः शब्दार्थो
वाउपलभ्यते येनानुभवकलहोपि स्यात्। न च साधारणपुरुषनिषेधमंतरेण पुंडरीकाक्षतारो
प्यारोपो दुर्घट इति सोपि व्यज्यत इति वाच्यं। रूपकोच्छेदापत्तेः। मुखं चंद्र इत्यादौ मुखनिषेध

४ रोपमात्रव्यंजनसमर्थस्य ४

र॰गं॰
१८५
185

मंतरेणचंद्रत्वंदुटारोपमित्यस्यापिसुवचत्वात्तत्रापिमुखेनिषेधापेक्षेतिचेत्प्रकृतेपितर्हि
ताद्दशसाधारणपुरुषत्वसामानाधिकरण्येनपुंडरीकाक्षतादात्म्यारोपरूपमसौराजापुंडरीका
क्षइत्साकाररूपकमेवभवितुमीष्टेनापह्नुतिः।यदपिचोच्यतेनायंपुंडरीकाक्षोऽपितुमन्मथइत्या
दितत्रयद्यपिचक्रसुपर्णाहरीकरणेननायंपुंडरीकाक्षइतिनिषेधःपुष्पचापध्वजगतमकरयोर्लि
खेनेनचमन्मथोपमितुपमानारोपश्चव्यंग्योभवितुमर्हतितथापिनासावपह्नुतिः।प्रकृतस्यनि
षेधेनपरस्यत्वप्रकल्पनमितित्वदुक्तलक्षणस्याप्यसत्त्वात्।अत्रहिनिषेध्यस्यभगवत
पुंडरीकाक्षस्यावर्णत्वेनाप्रकृततयाप्रकृतनिषेधाभावात्।नहिश्रवीरोपितनामात्रेणप्रकृत
त्वंवक्तुंशक्यं।प्रकृतपदस्यारोपविषयपरतयाविविद्धविषयमित्यादिनाक्षाप्रत्ययफलंध्रुवताभु
वैतैवस्फुटीकरणात्।काव्यंप्रकाशकृतापिप्रकृतंयन्निषिध्यान्यत्साध्यतेसात्वपह्नुतिरिति

श्री॰
१८५

स्तत्रैवव्याचक्षाणोनोपमेयपमेयमसत्यंकृत्वेत्यादिनाप्रकृतग्रहस्योपमेयपरतयैवव्याख्यानाच्च·प्राची
नमतसिद्धेयमपह्नुतिर्व्यंग्यत्वेनास्माभिरिहोच्यतेतदपिकुशकाशावलंबनमात्रंप्रकृतस्यनिषे
धेनेत्यादिलक्षणंकुर्वताभवतैवतस्यावहिःकरणात्।एवमपिउक्तरूपध्वेकोलंकारोव्यंग्यइतिचेत
।विच्छित्तिवैलक्षण्यातिरिक्तोन्यथात्वपह्नुतिरेवास्तुलक्षणंतुतदाप्रकृतयत्किंचिद्धर्मनिषेधसामा
नाधिकरण्येनक्रियमाणवस्त्वंतरारोपत्वमेव।तस्मात्सर्वमेवेदमहृदयंगमंसहृदयानां॥ ॥
इतिपंडितराजजगन्नाथनिर्मितेरसगंगाधरेऽपह्नुतिप्रकरणं।अथोत्प्रेक्षाप्रकरणं।तद्भिन्न
त्वेनतदभाववत्त्वेनवाप्रमितस्यपदार्थस्यरमणीयतद्वृत्तितत्समानाधिकरणान्यतरतद्धर्मसंब
धनिमित्तकंतत्त्वेनतद्वत्त्वेनवासंभावनमुत्प्रेक्षाऽलोकोत्तरप्रभावंत्वांमन्येनारायणंपरमितस्त्र
तादृशप्रभावस्यनारायणत्वव्याप्यतासंभावनादशायांसामग्र्यभावेनानुमित्यनुदयाज्ञापमाना

र॰गं॰ १८६

186

पांनाटापरोनानेनप्रायशोभवितव्यमितिसंभावतायामतिप्रसंगवारणपतद्विन्नत्वेनप्रमितस्येति
संभावनायामाहार्यतांगमयति। एतेनरामंस्निग्धनरश्यामंविलोक्यवनमंडले। प्रापोधाराधरोयं
स्यादितिनृत्यंतिकेकिनइत्यत्रसंभावनायांधाराधरेधियाधीरंनृत्यंतिस्मशिखावलाइत्यत्रप्र
तौचनातिप्रसंगः धदनकमलेनबालोस्मितसुषमालेशमावहतिपदा। जगदिहनन्देवज्ञाने
दशार्धबाणेनविजितमिति। अत्रजगज्ज्ञापंसंभावनायामतिप्रसंगवारणायरमणीयतद्धर्मनि
मित्तकमिति। स्मितस्यसंभावनोत्थापकत्वेपिजगद्विजितरूपविषयविषयिसाधारणत्वाभा
वान्नदोषः। एतेन। प्रायःपतेद्यौःशकलीभवेद्वा। संहाचलेरंबुधिभिस्स्खलेद्भोः। नूनंज्वलिष्यंति
दिशःसमस्तापद्वोपदीरोदितिहाहतेति। अत्रापिरोदनकारणीभूतकेशग्रहणादिजन्यपा
पनिमित्तोत्थापितायांस्वर्गपतनसंभावनायांनातिप्रसंगः। प्रायःस्थाणुनातेनभवितव्यंन

श्री॰ १८६

नं पुरुषेणानेन भाव्यं दूरस्थो पदेवदत्त इवाभातीत्यादौ निश्चलत्वं चलत्वा[illegible]दिसाधारणधर्म
निमित्तायां संभावनायामतिप्रसंगस्यादतो रमणीयत्वं धर्मगतमुपात्तं । रूपकवित्तावनिप्रसंगवा
रणाय संभावनमिति । अत्र च तादात्म्येन संसर्गेण धर्म्युत्प्रेक्षायाः संसर्गान्तरेण धर्मोत्प्रेक्षायाश्च सं
ग्रहाय एको क्ष्मालक्षणद्वयं विवक्षितं । सा चोत्प्रेक्षा द्विविधा वाच्या प्रतीयमाना च । इव नूनं मन्ये जा
ने अवैमि ऊहे तर्कयामि शंके उत्प्रेक्षे इत्यादिभिः क्वचनाचारष्किवादिभिः प्रतिपादकैः सहि
ता यत्रोत्प्रेक्षासामग्री तत्र वाच्योत्प्रेक्षा यत्र च प्रतिपादकशब्दरहितं तत्सामग्रीमात्रं तत्र प्र
तीयमाना । यत्र तत्सामग्रीरहितं प्रतिपादकमात्रं तत्र संभावनामात्रमेव नोत्प्रेक्षा सापि
प्रत्येकं त्रिविधा स्वरूपोत्प्रेक्षा हेतूत्प्रेक्षा फलोत्प्रेक्षा चेति । तत्र जातिगुणक्रियाद्रव्य
रूपाणां तदभावरूपाणां च पदार्थानां तादात्म्येनेतरेण वा संबंधेन जातिगुणक्रियाद्रव्या

र॰गं॰ १८७ 187

त्मकैर्व्यक्तैस्समुच्छ्रितैरुपात्तैरनुपात्तैः निःपन्नैर्निःपाद्यैर्वा निमित्तभूतैर्धर्मैर्यथासंभवं जातिगु
णक्रियाद्रव्यात्मकेषु विषयेषूत्प्रेक्षाणां स्वरूपोत्प्रेक्षा। तत्राभेदेन संसर्गेण धर्मि स्वरूपोत्प्रेक्षा
संसर्गान्तरेण धर्मस्वरूपोत्प्रेक्षेति चोच्यते। उक्तविधेषु पदार्थेषु प्रागुक्तप्रकाराणां पदार्था
नां तथापिधैरेव निमित्तैर्यथासंभवं हेतुत्वेन फलत्वेन च संभावनं हेतूत्प्रेक्षा फलोत्प्रेक्षा
चोच्यते। एताश्च कचिन्निष्पन्नशरीराः कचिन्निष्पाद्यशरीराश्चेत्येवमाधनल्पविकल्पाः
संपद्यन्ते तथापि दिङ्मात्रमुपदर्श्यते। आख्यायिकायां जात्यवच्छिन्नस्वरूपोत्प्रेक्षा प
था तन्मेनाकगवेषणालंबीकृतजलधिजठरप्रविष्टहिमगिरिभुजायमानाया भगवत्याः
भागीरथ्याः संखीति। अत्र भागीरथ्या द्रव्यजातौ वा हिमगिरिसंबंधी भुजत्वजात्यवच्छिन्न श्री॰
स्तादात्म्येनोत्प्रेक्ष्यते। तत्र च भागीरथीगतानां श्वैत्यशैत्यमलं वत्वजलधिजठरप्रविष्टत्वा १८७

न्तधर्मिणां निमित्ततानिद्वये विषयि हिमगिरि भुजगतत्त्वमवश्यं संपादनीयं तेषां च मध्ये नुपात्तयोः
श्वैत्यसशैत्ययोर्हिमगिरिसंबंधित्वादेव भुजगतत्त्वं संपन्नं। इतरयोरपि संपादनापत्तनयमेनाकग
वेषणांफलमुत्प्रेक्षितं तत्साधनताज्ञानस्थलं वत्वजनलधिजठरप्रवेशानुकूलपतनजनकत्वा
त्। एवं च विषयिगततादृशगवेषणाफलकत्वं वत्वजलधिजठरप्रविष्टत्वाभ्यां विषयगतयोः
साहविकत्वं वत्वजलधिजठरप्रविष्टत्वपारमेदाध्यावसानातिशयोक्त्या साधारणं संपन्ने
निमित्तता न चात्र फलस्याप्युत्प्रेक्षणात्फलोत्प्रेक्षेति वक्तुं शक्यं। उत्प्रेक्ष्यमाणफलनिःपा
दितनिमित्तो व्यापितापास्वरूपोत्प्रेक्षायामेव विधेयत्वाच्चैमत्कृतेर्विश्रामात् उत्प्रेक्षाप्रति
पादकस्य प्रत्ययस्य फलेनानन्वयाच्च तं पे वात्र व्यपदेशो युक्तः। अत्र निगीर्णविषया चेयं उ
पात्तानुपात्तगुणक्रियात्मकनिमित्ता। निष्पाधविशिष्टश्री राजातुसेक्षा हिमगिरिभुजंगस्य

र.गं.
१०८
108

कविनैव निःपादितत्वात्। तादात्म्येन गुणस्वरूपोत्प्रेक्षा यथा। अंभोजिनीबांधवनंदनायां कूज-
न्नवकानांसमजो विरेजे रूपांतराक्रांतमहस्समंतात्पुंजीभवन्नूपुमुक्तरवाश्रपार्थी। अत्रैकाधि-
करणतापन्नेकूजनविशिष्टेवकत्वेजात्यवच्छिन्नेविषयेपुंजीभवनविशिष्टः शुक्लगुणस्ता-
दात्म्येनोत्प्रेक्ष्यते। तत्रवकागतानां कूजननैर्मल्यपुंजीभवनानां शुक्लगुणगतत्वमंतरेणव-
कशुक्लयोरभेदस्यदुरुपपादत्वात्तत्सिद्धयेतेषां विषयिगतत्वंसाध्यं तत्रनैर्मल्यवत्कू-
जनपुंजीभवनयोर्निःपादनापरूपांतराक्रांतमहस्त्वमाश्रयार्थित्वं च हेतुत्वेनोत्प्रेक्षि-
तं इहापि प्राग्वत्साहजिकयोःकल्पितायामभेदाध्यवसानात्साधारण्यं। एवमन्यत्राप्यूह्यं। प्र-
वहि यथाफलस्योत्प्रेक्षणेपि न फलोत्प्रेक्षा तथेहापि हेतोरिति। क्रियास्वरूपोत्प्रेक्षा य- श्री०
थाकलिंदजानीरभरर्धमग्नावकाःप्रकामंकृतभूरिशब्दाः ध्वांतेनवैराद्वितिगीर्यमाणाः १०८

क्रोशंतिमन्येशशिनःकिशोराः। अत्र प्रथमांतविशेष्यकबोधवादिनामभेदसंसर्गसाकलिंदजानी
रार्धन्यग्रकृतभूरिशब्दोमपविशिष्टेषुवकेषुध्वांतकर्तृकवैरहेतुकनिगरणकर्माभिन्नत्वे
क्षितशशिकिशोरतादात्म्यात्प्रेक्षणपूर्वकक्रोशनकर्तृत्वधर्मउत्प्रेक्ष्यते। तत्रतादात्म्योत्प्रे
क्षणेधर्म्युत्प्रेक्षायांसाधारणोधर्मःसंबंधांतरेणोत्प्रेक्षणेधर्मोत्प्रेक्षायांतत्समानाधिकरण
धर्मश्चविषयगतोनिमित्तमितिस्थितेक्रोशनकर्तृत्वरूपधर्मोत्प्रेक्षायांतत्समानाधिकरणनि
गरणकर्मत्वस्यविषयगतत्वसिद्ध्यर्थंनुबाधतयाशशिकिशोरतादात्म्यमनुयातश्चेत्यनिमित्त
कमुत्प्रेक्ष्यते। तत्रयथाविशिष्टोपमायामुपमानोपमेयविशेषणतद्विशेषणानामप्यौपम्यमो
म्यमेवमत्रापिविषयवकविशेषणतद्विशेषणयोरर्धमज्जनयमुनाजलयोर्मूलत्वोत्प्रेक्षाविष
यिशशिकिशोरविशेषणतद्विशेषणाभ्यांनिगरणध्वांतांभ्यामभेदश्चार्थः। ततश्चध्वांतकर्तृ

र॰गं॰
१८९
189

कनिगरणोसिद्देमुख्यात्मेक्षानिर्वाहः।क्रोशनशब्दनयोरपिबिंबप्रतिबिंबभावेनाभेदःतेनकलिं
दजानीराधेमप्रकृतभूरिशब्दोभयाभिन्नावकाध्वांतविशीर्यमाणशशिकिशोरोभयाभिन्नाःक्रो
शनक्रियानुकूलव्यापारवंतइवेतिबोधाकारः।आख्यातभावप्राधान्येतुअभेदेनक्रोशनक्रि
यात्मेक्ष्या।तत्रशाब्देहृत्तेवकविशेषणतयाप्रतीयमानमपिशब्दनंविषयतयाऽवतिष्ठते।अ
ध्यवसानवशात्क्रोशनक्रियायांवक्तातादृशवकाविशेषणं।तादृशवकेषुचाभेदेनतादृशश
शिकिशोराःनतुशशिकिशोराएवसाक्षात्क्रियायां।एवंचवक्तानामनन्वयापत्तेः।विषयवि
षयिविशेषणानांप्राग्वदेवबिंबप्रतिबिंबभावेनाभेदप्रतिपत्तिः।तथाराज्याभिषेकपात्राय
शंबरासुरवैरिणः।सुधाभिर्जगतीमध्यंलिंपतीवसुधाकरः।अत्रापिचंद्रेविषयेतादृश
लेपनकर्तृत्वरूपधर्मोत्प्रेक्षेत्यकेदर्शनं।किरणव्यापनेविषयेचंद्रकर्तृकसुधाकरण

श्री॰
१८९

कलेयन स्पनादात्म्येनोत्प्रेक्ष्यामितिद्वितीयं। तत्र प्रथमे मते धवलीकारकत्वरूपनिमित्तानुपादाना
दनुपात्तनिमित्ता विषयस्योपादानादुपात्तविषया। द्वितीयेपि तस्यैव निमित्तस्यानुपादानादनु
पात्तनिमित्ता विषयस्य निगीर्णतया अनुपात्तविषयेति विशेषः। तदात्म्येन द्रव्यस्वरूपोत्प्रेक्षा यथा
कलिंदशैलादियमाप्रपागकेनापि दीर्घापरिखानिखाता। मन्ये तलस्पर्शविहीनमस्यामा
काशमानीलमिदं विभाति। अत्र यमुनायां नीलत्वदीर्घत्वनिमित्तकमाकाशतादात्म्योत्प्रे
क्षणं। आकाशत्वस्य स्वरूपात्मकत्वात् द्रव्योत्प्रेक्षेयं अत एवाकाशपदाद्धत्वाश्रयत्वाद्यनुप
स्थितिः दशायामप्याकाशधीः। नीलत्वरूपनिमित्तस्य विषयित्तिसिद्धार्थं तृतीयवरणोपा
दानं दीर्घत्वरूपनिमित्तसिद्ध्यर्थं च पूर्वार्धं जात्यादीनामभावोत्प्रेक्षा यथा। बाहुजानां समस्ता
नामभाव ईमूर्तिमान्। जयत्यतिबलो लोके जामदग्न्यः प्रतापवान्। अत्र जास्ते वह्निन्नाभा

र॰गं॰ १९० 190

वोविरोधित्वनिमित्तेनन्नैरात्म्यंतोत्प्रेक्ष्यते। विनाशइवेत्युक्तौ तु ध्वंसः समस्तलोकदुःखानामि
ति प्रथमचरणोक्तेर्गुणाभावः। घोरंतनकालीभिर्जेल्लदाल्लीभिस्तथाचेत्रजगदखिलमपिय
थासीद्दिल्लीचनवगीस्तर्गमिव। अत्रापिचाक्षुषज्ञानसामान्यशून्यत्वेननिमित्तेनतर्यायेतिकः
क्रियाभावोधर्मः। एवंद्रव्याभावोत्प्रेक्षापिस्वयमूह्या। मालारूपाप्येषासंभवति। तथा। द्वि
नेत्रइववासवःकरयुगोविवस्वानिवद्वितीयइवचंद्रमाःश्रितवपुर्मनोभूरिवानराकृतिरिवां
बुधिर्गुरुरिवक्ष्मामागतोनुतोनिखिलभूसुरैर्जयपतिकोपिभूमीपतिः। अत्रराजगतानांद्वि
नेत्रत्वादीनांवासवादितादात्म्यविरोधिनोविरोधनिवर्तनायविषयिषुचासवादिष्वप्या
रोपेणासाधारणीकरणेन त्वात्रोपमाशंक्यनिरूपणाद्द्विनेत्रत्वादीनांमुक्तेर्निःप्रयोज श्री॰
नकत्वापत्तेःनचोपमायामि।पादकंतेषांसाधारण्यंतदभावेपिपरमैश्वर्यादिभिःप्रती १९॰

यमानैस्तस्यानिःपत्रैः असुंदरत्वादुपमानिःपादकत्वेनकवेरनभिमेनत्वाच्चानत्यत्रहिनेत्रत्वादिभि
धर्मैर्दसिवादिसादृश्यंरात्तः कवेरभिप्रायविषयःएवं द्वितीयत्वादीनांचंद्रादिष्वारोपोप्युपमायां
सत्यामनर्थकएवस्यात्।अभेदप्रतिपत्त्रौतुसहस्रनेत्रेणसहस्रकरेणविधिसदृशवेकेनवपुर्वि
हीनेनजलाकारेणस्वर्गगतेनकथमस्याभेदःस्यादितिप्रतिकूलधियमयसारयतोविषयिगता
नोह्विनेत्रत्वाद्यारोपाणामस्त्येवोपयोगः अत्रैवेवशब्दस्याभावेदढारोपंरूपकंविषयिगतवि
शेषणानामभावेउपमा।उभेयेषामेकतरस्याप्यभावेमुद्रूपकमितिविवेकः।एवंस्वरू
पोत्प्रेक्षादिरुपदर्शिता।अथहेतूत्प्रेक्षा।यथा।त्वत्प्रतापमहादीपशिखाविपुलकिंज्जलैः
।नूनंनभस्तलेनिसंनीलिमानूतनायते।अत्रनीलिमसामाधिकरण्येनोत्प्रेक्षितस्यहेतु
त्वेनोत्प्रेक्षणं।कज्जललेपनैरितिकृतेइयमेवक्रियाहेतूत्प्रेक्षागुणाहेतूत्प्रेक्षा।यथा।

13

र॰गं॰ १९१

१९१

।परस्परासंगसुस्वान्नतम्रुवः पयोधरौपीनतरौवभूवतुः।तयोरमृष्यन्नयमुन्नतिंपरामवेमिमध्यस्त
निमानमंचति।अत्रपूर्वार्धेमुखस्यगुणहेतुत्वेनावसंचम्यैवनिर्दिष्टं।अपरार्धेधर्मिविशेषणत
याऽनुधमानस्यगुणभावस्यलाभर्थयथा-मोक्ताभुंजानोवातृप्यतीसारैभोजनंरैः।यथावाचंप
गुञ्जन्मधुकरंपुंजमंजुगीताभाकर्णयस्कतिमुदयअयातिरेकात।आभूमीतलनतकंधराणिम
रन्यारण्येस्मिन्नवनिरुहांकुडुंबकानि।क्रियाहेतूत्प्रेक्षायथामहागुरुकलिंदमदीधरोदरवि
दारणविर्भन्महापातकावलिवेल्लनादिवश्यामलितेति।द्रव्यहेतूत्प्रेक्षायथा- वराकायंस
कारमणाइतिवल्ल्यांतिसहसामरःस्वछंमन्येमिलदमृतमेतन्मखभुजां।अमुष्यान्याकापि
षुतिरतिघनाभातिमषतामिपनीलच्छापादुपरिनिरयायाऽगनतः।अत्रामत्तसरोरूपत्वेनो श्री॰
त्प्रेक्षितेचंद्रमसिनीलत्वेनाध्यवसितेकलंकेउपरिवर्तिनमोहेत्तुकत्वमुत्प्रेक्ष्यते।एवंत्तनद्र १९१

व्यस्य हेतुत्वेनोत्प्रेक्षणं नास्तीति प्राचां प्रवादो निरस्तः। एषामेवाभावानां हेतुत्वोत्प्रेक्षा यथा निता
न्तरमणीयानि वस्तूनि करुणोज्झितः। कालः संहरते नित्यमभावादिव चक्षुषः। अत्र कालस्य साह
जिके संहारके त्वचक्षुरभावस्य हेतुत्वेनोत्प्रेक्षा। निःसीमशोभासौभाग्यं नतांग्या नयनद्वयं। अन्यो
न्यालोकनानंदविरहादिव चंचलं। अत्र गुणाभावस्य। जनमोहकरं नवालि मन्ये चिकुराकारमिदं
धनांधकारं। वदनेंदुरुचामिहाप्रचारादिव गत्वं गिनितांतकांतिकांते। इह द्वितीयार्धे क्रियाभावस्य
।प्रथमार्धे तु जात्यवच्छिन्नाभावस्य जात्यवच्छिन्नस्य वा स्वरूपोत्प्रेक्षैव। न नगाः काननगा यदुद
तीषु त्वदरिभूपसुदतीषु शकलीभवंति शतधा शंके श्रवणेंद्रियाभावात्। इह श्रोत्रत्वस्य जाति
गुणक्रियाभ्यो तिरिक्तस्य विवेके क्रियमाणे आकाशस्वरूपतया तदवच्छिन्नाभावस्य द्रव्या
भावस्य हेतुत्वेनोत्प्रेक्षा। निमित्ते च क्रियाभावः एवं हेतृव्येन्नादिक्। अथ फलोत्प्रेक्षा। दिवानिशं

र.गं.
१९२
192

वारिणिकंठदघ्ने दिवाकराधनमाचरंतीवक्षोजतापे किमुपक्रमलाक्ष्यातपश्चरत्यंबुजपंक्तिरेषा।अत्रवक्षो
जतापमेवपतनहंत्रिजातिस्तल्लभत्वपार्थः तत्तलोः प्रकृतिरूपेप्रवृत्तिनिमित्तएवविधानात्।सएवचात्रतप
श्चरणक्रियायाः साहजिकजलावस्थानाभिन्नतयाध्यवसितायाः फलत्वेनोत्प्रेक्ष्यते न चात्रप्राप्ति
क्रियामंतरेणजातेः श्रेष्ठायाअफलत्वात्क्रियायाएवफलत्वमितिवाच्यं।प्राप्तेः संसर्गतयात्मद्वारैव
जात्यादेः फलत्वोपपत्तेः।अन्यथाफलत्वबोधकचतुर्थ्याअनुपपत्तेः अतएवब्राह्मण्यायतपस्ते
पेविश्वामित्रः इत्युदाहरणमित्यादयः प्रयोगाः।गुणफलोत्प्रेक्षायथा। वियोगवह्निकुंडेस्मिन्हृदयेतेवि
योगिनिप्रियसंगमसुखायेवमुक्ताहारस्तपस्यति।क्रियाफलोत्प्रेक्षायथा हालाहलकालानल
काकोदरसंगतिकरोतिविधुः।अभ्यसितुमिवतदीयांविद्यामद्यापिहरशिरसिगतः अत्रविरहि
वाक्येभ्यसनक्रियायास्तुमुनाफलत्वंलभ्यते।एवंलक्ष्यानुसारेणयथासंभवमन्यदप्युदाहार्यं

श्री०
१९२

रहजात्यादयो हि भेदाः प्राचामनुरोधादुदाहृता। वस्तुतस्तु नैषां चमत्कारवैलक्षण्यमस्तीत्यनुदाहृ
तान्येव। चमत्कारवैलक्षण्यं पुनर्हेतुफलस्वरूपात्मकानां त्रयाणां प्रकाराणामेवेति। आद्युदाहृतेष्व
वपधेयुवाचकानामिवादीनांत्यागे प्रतीयमाना। अर्थसामर्थ्याविसेषत्वात्। ननुव्यंग्यापत्तिरिति
चेत्। तस्याः प्रकृतेप्रसंगाभावात्। धर्मस्वरूपोल्लेखो यथा। निधिं लावण्यानां तव खलु मुखं निर्मित
वतो महामोहमन्ये सरसिरुहसूनोरुपचितौ। उपेक्ष्य त्वां पस्माद्विधुमयमकस्मादहह कृती कलाही
नं दीनं विकल इव राजानमनतोत। पूर्वार्द्धे प्रेक्षितमोहरूपधर्मसिद्धये द्वितीयार्द्धे विचार्य
कारित्वं तत्समानाधिकरणेनोपात्तं अत्र स्याच्च स्वरूपस्यो विधायित्वे निमित्तभूतो धर्म उपमायामिव
बिंबप्रतिबिंबभावादिर्भिन्न उपात्तोनुपात्तश्च। हेतुफलयो विधायित्वे तु पंप्रति हेतुफले निरूपि
ते सधर्मः कल्प्यमानोपि विषयगतसाहजिकधर्माभिन्नतयाध्यवसीयमानो निमित्तं संपद्यते

र॰गं॰
१९३
193

मचोपात्तएवभवति।अन्यथाकंप्रतिहेतुफलयोरन्वयःस्यादितिसंक्षेपः।अत्रवमाचांमर्धाचांचानेक
धादर्शनंव्यवस्थितं।तत्रप्राचामित्थं।सर्वत्राभेदेनैवविषयिणोविषयेउत्प्रेक्षणंनसंबंधांतरेण।
तथाहिधर्मिस्वरूपोत्प्रेक्षायांमुखंचंद्रमस्येइत्यादौतावद्विषयिणश्चंद्रस्याभेदोविषयेमुखेस्फुट
एव।नामार्थयोर्भेदेनसाक्षादन्वयस्याव्युत्पत्तेः।उपात्तविषयोचेयं।एवंत्रस्यांमुनीनांनामपिमोहमू
हइत्यत्रनैषधपद्येधर्मस्वरूपोत्प्रेक्षायामपिमुनिसंबंधिनिधर्मांतरेविषयेदमयंतीविषयकमोहस्यवि
षयिणोभेदेनैवोत्प्रेक्षणं।उत्प्रेक्षायाश्चसाध्यवसानत्वाद्विषयस्यानुपादानेसंगच्छते।निमित्तधर्मश्चात्र
त्तदंगासक्तहृतित्वं।एवंलिंपतीवतमोगानिवर्षतीवांजननभइत्यादौकस्यापिमतेनप्रथमांतार्थक
र्तुरिलेपनकर्तृत्वारेहत्प्रेक्षणं।तस्याख्यातार्थविशेषणत्वेनैकदेशत्वात्।नापिलेपनादिकर्तु
रभेदेन।तस्यक्रियाविशेषणत्वेनाप्राधान्यात्।किंतुतमःकर्तृकमंगकर्मकंलेपनमुत्प्रेक्ष्यतेनभः

श्री॰
१९३

कर्तृकमंजनकर्मकंवर्षणंच।उत्प्रेक्ष्यमाणमप्युक्ताभ्यांविषयस्यतमःकर्तृकव्यापारस्यविगीर्णत्वाद
नुपादानं।अतएवैवमादावियमनुपात्तविषयोच्यते।निमित्तधर्मश्चश्यामीकारकत्वादिरनुपात्तएव
।अतएवसंभावनमथोत्प्रेक्षाप्रकृतस्यसमेनयदितिलक्षणंविधायोक्तंव्यापनादिर्लेपनादिरू
पतयासंभावितमितिमम्मटभट्टैः।एवं।उन्मेषंयोममनसहतेजातिवैरीनिशायामिंदोरिंदी।नीतः
शांतिंप्रसभमनयावक्त्रकांत्येतिहर्षाल्लग्नामन्येललिततनुतेपादयोःपद्मलक्ष्मीरित्यादौदो
र्भाचीनयथेहेतूत्प्रेक्षायामपिनहर्षोहेतुमात्रमुत्प्रेक्ष्यतेलक्ष्मीरूपविषयेकिंतुतद्धे
तुकंकार्यंलगनादिरूपंविषयितादात्म्येनसाहजिकलगनादौविषये·कार्यस्यनिमित्तताव
दिनापिविषयगतत्समानजातीयेनाभेदाध्यवसानस्यावश्यवाच्यत्वादन्यथाहेतुरूपविषयि
समानाधिकरणधर्मस्यकार्यरूपस्यविषयावृत्तित्वात्तदुत्प्रेक्षैवनस्यात्·एवंचोल्लस्ययद्गीति

र॰गं॰
१९५
195

पलापितस्यभालत्वंचकंटकिनोवानांत्ताः अथापिकिंवानुभविष्यतीतिअपाटयन् दृष्टमिवाक्ष
राणीत्यादिपरयथेफलोत्प्रेक्षायांकंटकिषुवनांत्रेषुविषयेषुनकेवलंभालात्वग्विपाटननिमि
त्तकेललाटाक्षरदर्शनंफलमुत्प्रेक्ष्यतेकिंतुतत्फलकंभालत्वग्विपाटनादिरूपविषयिकं
टकजविपाटनादोविषयेतादात्म्येनेतिसर्वत्राभेदेनैवविषयेविषयिणउक्षणमितिदर्शनं
।तत्रविचार्यते।नसर्वत्राभेदेनैवोत्प्रेक्षणमितिनियमेकिंविदस्तिप्रमाणंलक्ष्येषुभेदेना
प्युत्प्रेक्षणस्यदर्शनादस्यामुनीनामपिमोहमूहरस्यादौ।नचमुनिसंबंधिनिधर्मेविशे
षेमोहस्याभेदेमात्प्रेक्षणमितिवाच्यं।भेदेनोत्प्रेक्षणबाधकाभावेनेदृशकल्पनायानि
रर्थकत्वात्।नत्वभेदेनैवोत्प्रेक्षणमितिवेदेनबोधितंपदर्थमयमाग्रहःस्यात्।लक्षण
निर्माणस्यपुरुषाधीनत्वात्।लिंपतीवतमोगानीत्यत्रापिलेपनादिकर्तृत्वंतमआदि

श्री॰
१९५

षुविषयेषूत्प्रेक्ष्यत इत्येव युक्तं। अनुकूलव्यापारात्मकस्य कर्तृत्वस्यैवाख्यातार्थत्वात्तस्य च
प्रथमांतविशेष्यत्वाश्रयतासंसर्गेणान्वयान्न दोषः भावप्रधानमाख्यातमित्यस्य भावो
व्यापारस्तदर्थकमाख्यातमिति डित्यर्थकारणान्न विरोधः सत्वप्रधानानि नामानीत्यत्र
वाक्यगतस्य प्रधानशब्दस्याभिधेयपरत्वात् फलमात्रार्थस्याप्रधानेनाख्यातार्थव्या
पारस्याधिकरणत्वसमानाधिकरणत्वाभ्यामर्थगताभ्यां सकर्मकाकर्मकत्वव्यवहारः
नामार्थयोर्भेदेनान्वयाभावाच्च भावकदर्थव्यापारस्य न नामार्थेन्वयः अत एव चक
र्त्तरिक्तादित्यनेन विशिष्टशक्तिबोधकेन नधआदिषु भावग्रहणास्य विशेषशक्तिबोध
कस्य गतार्थता। शब्दानुवृत्तिपक्षस्वीकाराच्च कर्त्तरिक्तिदित्यत्र धर्मिपरस्यापि कर्तृग्र
हणस्य फलः कर्मणीत्यत्र धर्मपरतायामपि न दोषः। यद्वा। स्तां फलव्यापारौ धातो

२.गं. राश्रयश्चतिङोऽर्थः परंतु देवदत्तः पवमान इत्यादाविव देवदत्तः पचतीत्यादिष्वपि प्रथमांतार्थ एव तिङ
१९५ र्थस्याभेदेन विशेषणत्वं युक्तं न तु भेदेन धात्वर्थभावनायाः। सर्वजनसिद्धस्योद्देश्यविधेयभाव
195 स्य भंगापत्तेः। सत्यां हि प्रतीतौ प्रत्ययार्थं प्रकृत्यर्थविशेषणमित्यस्योत्सर्गस्य प्रत्युतानुग्रह एव स्याप्यः
।भावप्रधानमाख्यातमित्यस्य भावनार्थको धातुरर्थकारणान्न विरोधः न चैवं याकरणाम
नविरोधाद्दूषणमिति वाच्यं। स्वतंत्रत्वेनालंकारिकतंत्रस्य तद्विरोधस्यादूषणत्वात् प्रपंच
यिष्यते चैतदधिकमुपरिष्टादिति प्रकृतमनुसरामः एवं च लिंपतीवेत्यात्क्षभेदेन वा तिङर्थस्यै
व प्रथमांतार्थ एवोत्प्रेक्षणं नंतु धात्वर्थस्य स्वनिर्माणव्यापनादेः सर्वजनसिद्धायाउ वा
र्थस्य विधेयतापत्त्यनुपपत्तेः तमः कर्तृकं लेपनमिवेत्यस्मादपि उद्देश्यबोधकशून्यत्ववाक्या श्री०
दुत्प्रेक्षाप्रतीत्यापत्तेश्च यद्दिच विषयिसंबंधिना लेपनादिना विषयसंबंधिनो व्यापनादेर्नि १९५

र्मित्रतासंपन्नेपंखताद्रूप्यसंपादनेननिगीर्णत्वादनुपात्तविषयत्वमध्यवसानमूलत्वंचोच्य
तेतदारूपकेप्यनुपात्तविषयत्वमुच्यतामध्यवसानमूलत्वंचलोकानहंतिखलोविषमि
त्यादौखलसंबंधिनोदुःखदानादेविषसंबंधिहननात्मनाध्यवसानात्‌ःतस्मान्निमित्त
शेऽतिशयोक्तिरेव।एवंमुन्मेषपोममनसहरत्यत्रलक्ष्मीरूपेविषयेलगनहेतुत्वेनहर्ष
उत्प्रेक्ष्यतेतत्रसाहजिकसंबंधेतादात्म्येनाध्यवसितंलगनमेवनिमित्तं।तथासेघास्थली
यत्रविचिन्वतात्वांभ्रष्टंमयानूपुरमेकमुर्व्यां।अदृश्यततच्चरणारविंदविश्लेषदुःखादिव
बद्धमौनं।अत्रापिमौनहेतुत्वेननूपुरेविश्लेषदुःखमुत्प्रेक्ष्यते।तत्रनिश्चलत्वनिमित्तकनिः
शब्दत्वाध्यवसितंमौनंनिमित्तंविश्लेषदुःखसमानाधिकरणत्वेसतिनूपुरवृत्तित्वात्‌ःननु
निश्चलत्वनिमित्तकेनिःशब्दत्वेविषयेविश्लेषदुःखहेतुकमौनमभेदेनउत्प्रेक्षायामिवश

र०गं०
१९६
196

द्धान्वितस्योत्प्रेक्ष्यतायाउत्सर्गसिद्धत्वात्‌विषयविश्लेषदुःखहेतुकमोक्षमभेदेनउत्प्रेक्ष्यनिगीर्ण
तयाविषयविरोधोविधेयत्वानुपपत्तेश्चनिमित्तान्तरगवेषणायनैश्चल्यपिएककालमेभवतादिरस्ति
साधारणोधर्मोनिमित्तंतथापितस्याचमत्कारीत्वादुपमायामिवोत्प्रेक्षायामप्यप्रयोजकत्वात्‌
एवंफलोत्प्रेक्षायामपिवोध्यं एतेनयद्वाहेतुफलधर्मस्वरूपोक्षोदाहरणेष्वपितादात्म्येनैवो
त्प्रेक्षेतिप्राचांमतमनुसरताद्रविडपुंगवेनयदुक्तंतदपिपरास्तं।अलंकारसर्वस्वकृत्तावदु
त्प्रेक्षणमित्थंनिगदितंविषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोध्यवसायः सचद्विविधः
सिद्धः साध्यश्चतत्रसाध्यत्वप्रतीतौव्यापारप्राधान्येउत्प्रेक्षेति।अस्यार्थः सिद्धत्वंनिगीर्ण
विषयत्वं साध्यत्वंचनिगीर्यमाणविषयत्वं यत्रहिसिद्धत्वंतत्राध्यवसितप्राधान्यंयथाति श्री०
शयोक्तादौयत्रसाध्यत्वंतत्रव्यापारस्याध्यवसानक्रियायाः प्राधान्यउत्प्रेक्षेति एवमभेद १९६

गर्भमुत्प्रेक्षालक्षणं विधाय सैषा स्थली पुत्रेत्यत्र नूपुरगतस्य मौनित्वस्य हेतुत्वेन दुःखगु
णवत्त्वमुत्प्रेक्ष्यते· तत्र मौनित्वमेव नूपुरगतनिःशब्दत्वाभेदेनाध्यवसितं निमित्तमित्युक्तं। ए
वं पत्र धर्मेण च धर्मिगतत्वेनेत्यादिना धर्मोत्प्रेक्षाप्रसंगे लिंपतीव तमोऽङ्गानीत्यत्र लेपन
क्रियाकर्तृत्वोत्प्रेक्षणे व्यापनादिनिमित्तमित्युक्तं। तदेतत्सर्वं परस्परविरुद्धं। न हि दुःखगु
णोत्प्रेक्षायामभेदेनाध्यवसायोस्ति। मौनांशे सत्तस्याध्यवसायः सिद्धत्वादतिशयोक्तेरेवावि
षयो भवितुमर्हतीति नोत्प्रेक्षायाः त्वन्मते मौनस्य निमित्तत्वेनानुत्प्रेक्ष्यत्वाच्च। एवं लिंपतीवेत्यत्र
लेपनीशाध्यवसायोपि। तस्यापि व्यापनरूपतयापस्थितस्य त्वया त्वया कर्तृत्वोत्प्रेक्षानिमि
त्तत्वेनोक्तत्वाच्च व्यापनादौ तूत्प्रेक्षाविषये निमित्तमन्यदन्वेष्यं स्यादिति त्वत्पेव वाधकस्या
पन्यासात्। निमित्तांशाध्यवसानं तूपमादावपि स्थितं। किंच नूनं मुखं चंद्र इत्यादौ कुत्र

ध्यवसायः। विषयस्य ज्ञानग्राहकत्वात्। न च सिद्धे ध्यवसाये विषयस्य जठरवर्तित्वं साध्ये नु निगीर्यमा
णत्वात्स्थगुपपत्तिरिति वाच्यं। साध्यवसाने मानाभावात्। अन्यथा रूपकादेरप्यध्यवसानगर्भ
त्वापत्तेः। किंच। अध्यवसाने लक्षणाभेदः। न चात्र विधेयांशे पांशे लक्षणास्ति। अभेदादिसं
सर्गराहार्यबोधस्यैव स्वीकारात्। तस्मात्प्राचीनामाधुनिकानां चोक्तो यो न क्षोदक्षमाः। एवं प्रा
सङ्गः। तत्र तावदुत्प्रेक्षानिष्कर्षः प्राचीनमतपरीक्षावसरे कृत एव हि पवाद्युत्प्रेक्षायां तु पंच
म्यर्थो हेतुरभेदश्चात्र कृतिमत्कृत्यपार्थयोः संसर्ग इति पक्षे विश्लेषदुःखाभिन्नो हेतुः पंचम्य
तार्थः तस्य च प्रयोज्यतासंसर्गेणोत्प्रेक्षणे नैव वादिनाबाध्यते। प्रयोज्यत्वं पंचम्यर्थ इति
दर्शने निरूपितत्वं प्रकृतिप्रत्ययार्थयोः संसर्गः। आश्रयतासंसर्गेणचोत्प्रेक्षणं उभयथा
पि पंचम्यर्थ एवोत्प्रेक्षते नैव वाद्यर्थान्वयात्। उत्प्रेक्ष्यतावच्छेदकसंबंधेनोत्प्रेक्ष्यसमा

नाधिकरणश्चधर्मातिशयोक्तमो नाभिन्नत्वेनाध्यवसितनिश्चलत्वादिनिमित्तं वहूमो नंच विष
यमो न द्वारकं च वद्रूमो न स्य प्रयोज्यत्वं संभाव्यते। एवं प्रयोज्य धर्मके धर्मिणि सर्वत्रापि धर्मद्वा
रक एव पंचम्यर्थान्वयः यत्र तु धर्म एव किंचिद्धर्मीभिन्नत्वेनाध्यवसितः साक्षाद्विषयः तत्र वि
षयतावच्छेदकधर्मो निमित्तं। यथा तत्रैव विश्लेदुः खादि वर्मो न मस्येति निर्माणो मौनत्वं। एवं
तत्रीयार्थविवोध्यं। फलोत्प्रेक्षायां तु मुख्यादेरर्थः फलं। प्रागवत्प्रकृत्यर्थप्रत्ययार्थयोरभेदसं
सर्गः तच्च साधनतासंसर्गेणान्वेतीति तेनैव संसर्गेणोत्प्रेक्ष्यते। यत्र चोत्प्रेक्ष्यते तं देशवि
शेषणतयाभासमानो धर्मो निमित्तं। तत्र धर्मिणि विषये ऽभिन्नत्वेनाध्यवसितो धर्मस्त
थाभूते च धर्मे विषये तद्विशेषणीभूतान्यं इति विवेकः एवं च यत्र समासप्रत्यययोगुणीभूत
विषये हेतुफलात्वयोन साक्षात्संभवति तत्र प्रधान एव विषये तादृशविशेषणद्वारक

र॰गं॰
१९८
198

प्रयोज्यत्वप्रयोजकत्वाभ्यां संसर्गाभ्यां हेतुफलयोरुत्प्रेक्षा बोध्या। एवमपि विशेषणेऽपि यथा कथं
चिद्धेतुफलयोरन्यतराद्विशेषणस्यापि विषयत्वमुचितं। तथापि विषयविषयिणोरुद्देश्यवि
धेयभावप्रत्ययस्यानुरोधादियं सरणिराश्रिता यदि च तस्य नास्त्येवानुरोधस्तदा प्राचां दर्श
नमेव रमणीयं स्यात्। किंच। प्राचां मते हेतुफलोत्प्रेक्षास्थले तु हेतुकर्तृफलकयोः। कार्यका
रणयोरेव निगीर्णे विषये उत्प्रेक्षणात्स्वरूपस्योत्प्रेक्षायामेव पर्यवसानं न हेतुफलयोः। एवं
च विभागश्चिरंतनानामुच्छिन्नः स्यात्। अथ स्वरूपतादात्म्याविशेषेऽपि हेतुफलाविशे
षणकशुद्धस्वरूपोत्प्रेक्षायाः हेतुफलविशेषणकस्वरूपोत्प्रेक्षायामस्ति हेतुफलकृत एव
भेद इति चेत्। तन्न। यथा मैनाकगवेषणलंबीकृतजलधिजठरप्रविष्टहिमगिरिभुजायमानाया भग श्री॰
वत्या भागीरथ्याः स्वीति प्रागुदाहृतायां स्वरूपोत्प्रेक्षायां तन्मैनाकगवेषणरूपस्य फल १९८

सोत्प्रेक्ष्याविशेषणाकोटिप्रविष्टत्वात्फलोत्प्रेक्षात्वापत्तेः।उत्प्रेक्ष्ये साक्षाद्विशेषणतापन्नप्रयो
जकत्वादिसत्त्वं स्वगोत्रकलहेन।उत्प्रेक्ष्यमाणेष्वपि यस्य विषयिणा उत्प्रेक्षाविधेयतया भास
ते तदीयोत्प्रेक्षयैव व्यपदेशः प्राधान्यात् तेन विश्लेषदुःखादिव बद्धमौनमित्यत्र न पुरगतत्वेन
दुःखस्योत्प्रेक्षणेपि न तदुत्प्रेक्षया व्यपदेशो न्याय्यः तस्याङ्गत्वेनानुवाधत्वात्· किंतु पंच
म्यर्थोत्प्रेक्षया· तस्या एवशब्देन विधेयत्वात्· तथा चोलस्येति पद्येपि वनांतगत्वेन न लला
टाक्षरदर्शनोत्प्रेक्षयापि· च्यपितु तुमुन्नर्थोत्प्रेक्षया।एवं तनयमैनाकेत्यादिगद्येन फलोत्प्रेक्ष
याव्यपदेशः नायिकलिंदजानीरभरेर्द्धमग्नाउत्पन्नशशिकिशोरतादात्म्योत्प्रेक्षया तदुत्थापि
तयाध्वांतकर्तृकवैरहेतुकनिगरणकर्मतादात्म्योत्प्रेक्षया वा· प्रागुक्तादेव हेतोरिति दिक्
।द्विविधो हि तावद्धर्मोपि स्वतएव साधारणः साधारणीकरणोपायेनासाधारणोपि साधारणी

र·गं·
१९९
199

कृतश्च·सचोपायःक्वचिद्रूपकंक्वचिच्छ्लेषःक्वचिदपह्नुतिःक्वचिद्बिंबप्रतिबिंबभावःक्वचिद्बिंबप्रति
बिंबभावःक्वचिदुपचारःक्वचिदभेदाध्यवसायरूपोतिशयाः यथा·नयनानंदसंदोहमंदिरंमि
लदिंदिरं। इदमिंदीवरंमन्येसुंदरांगितवाननं। अत्रप्रथमार्धगतःप्रथमोधर्मोरूपकेणविषय
विषयिसाधारणीकृतः। द्वितीयश्चविलक्षणशोभयोरभेदाध्यवसायेन·केवलशब्दात्मको
प्ययंसंभवति। अंकितान्यक्षसंघातैःसरोगाणिसदैवहि। शंकेपंकेरुहाणीतिशरीराणिश
रीरिणां। अयमुपात्तएवभवति। अर्थमयेत्वनुपात्तश्चापिभवति·यथा·द्विनेत्रइववासवइत्या
दौजगदीश्वरत्वादिः। नचात्रद्विनेत्रत्वादिरूपउपात्तएवसाधारणोधर्मःसाधारण्यार्थमेवत
स्यविषयिण्यारोपादितिवाच्यं। तस्यारोपेणसाधारणत्वकृतेपिसुंदरत्वेनोत्कर्षेणोत्कर्षापक
त्वविरहात्। साधारणीकरणंतुप्रतिबंधकनिरासार्थमित्युक्तमेव। आदृष्टिःसंभृतमंगलावुधम

श्री०
१९९

पीरेव त्वदीपासमभाकाव्यस्या अथयमूतमास्यमरुणाविरोधरक्ततुंदरः क्रोधस्त्वेशनिर्मूलनल्पविषणास्वां
तंतु सोमास्यदं राजन्नूनमतुलविक्रम भवान्सर्वग्रहालंबनो। अत्रोत्प्रेक्ष्यमाणस्य सर्वग्रहालंबनस्य
धर्मेषु तन्नुहाश्रितागकत्वेषु विशेषणीभूतेस्त्तनुद्दे विषयस्य राज्ञो धर्मेषु कल्याणाश्रयत्वा
दिषु विशेषणानां कल्याणादीनां श्लेषेण तादात्म्यसंपादनद्वारा तादृशधर्मेणां साधारणतासंप
त्तिः। यथा वा। विभाति यस्यां ललिताललितालकायां मनोहरा वैश्रवणस्य लक्ष्मीः कपोलपालिं
तव तन्विमन्ये नरेंद्रकन्ये दिशमुत्तराख्यां। इहापि विषयाविषयिधर्मे विशेषणयोरकालकयो।
श्रवणवैश्रवणयोश्च श्लेषेणाभेदे धर्मस्य साधारण्यं। यथा वा। नासत्ययोगो वचनेषु कीर्तितथा
र्जुनः कर्मणि चापि धर्मः। विनेजगत्प्राणभवा पदात्तेव शंवदास्तेकिमु पांडुपुत्राः। अत्र पांडुपुत्रे
षु विषयेषु राजवशंवदत्वादात्म्यान्त्रप्रोक्षायां राजाश्रितत्वरूपो विषयिधर्मः श्लेषेण विषयाणांत

र॰गं॰ राश्रितामांचासत्यासत्याभावशुक्लगुणगुणपर्यायभ्रमणामभेदसंपादनद्वाराविषयसाधारणीकृतः।
२०० स्तनांतर्गतमाणिक्यवपुर्बहिरूपागतः। मनोनुरागस्तेतन्विमन्येवल्लभमीक्षते। अत्रवल्लभेक्षणस्यम
200 नस्युत्प्रेक्षायांतन्निमित्तंमतःप्रदेशाद्बहिरागमनमुपेत्यंतच्चबहिःप्रदेशसंबंधरूपमाणिक्यमा
च्छवृत्तिमनसोनसंभवतीतिमाणिक्यायद्गुह्यामनोगतंक्षिप्तोबिंबप्रतिबिंबभावस्तककलिंदजा
नीरभरेधंमग्नाइत्यत्रैवनिरूपितः। माधुर्यपरमसीमासारस्वतजलधिमथनेनसंभूता। पिबतामनल्प
सुखदावसुधायांननुसुधाकविता। अत्रकवितायांमाधुर्ययानयोर्मुख्ययोरसंभवादास्वादश्रवणयो
रमुख्ययोरुपचारेणमुख्याभ्यांसाधारणीकरणं। लक्षणयाशक्याभेदेनलक्ष्यबोधनात्। अभे
दाध्यवसायमात्रंयथाप्रागुदाहृतायांहेतूत्प्रेक्षायांव्यागुंजन्मधुकरपुंजमंजुगीताभित्यत्रशाखा श्री॰
नीचत्वकंधरानमनयोरभेदाध्यवसायएवत्रयाहेतूत्प्रेक्षानिनतपापात्रस्यकंधरानमनस्यनी २००

चशाखनतकंधरोभयसाधारणेपिबीजं। एवंसर्वत्रहेतुफलरूपउत्प्रेक्षणीयस्यहेतुफलत्वंचोत्प्रेक्ष्यतेसो
नेनप्रकारेणसाधारणीकृतोनिमित्तमित्यसकृदावेदितं। एवंक्वचिदुपात्तोधर्मोविषयिसाधारण्या
भावादस्फुटरत्वाद्वास्वयमुत्प्रेक्षणंसाक्षादुत्थापयितुमसमर्थोपितदुत्थापनक्षमधर्मान्तरो
त्थापनेनानुकूल्यविधानादुपयुज्यते। यथा· धीरंजनकान्तीभिरितिप्रागुदाहृतेपद्येस्वोज
लदालीसमावृतत्वरूपोधर्मउपात्तोजगतोनिर्लोचनवर्गसर्गत्वोत्प्रेक्षायांवैयधिकरण्याद
प्रयोजकोपिस्वप्रयोजकोपिस्वप्रयोज्यनिर्विरोधकाकारमयुयुक्तवासुषत्तानसामान्यशू
न्यत्वस्तथाविधोत्प्रेक्षानिमित्तस्योत्थापनेनाविषयोप्युपात्तोनिरूपितएव। क्वचिदयमप
न्हुतोपिभवतियथाजगदंतरममृतमयैरंशुभिरापूरयन्नितरां। उदयतिवदनव्याजात्कि
मुराजाहरिणशावनयनायाः इत्युत्प्रेक्षाप्रकरणं। अथातिशयोक्तिः विषयिणाविषयस्य

निगरणमतिशयस्तस्योक्तिस्तच्चस्ववाचकपदेनशक्यतावच्छेदकरूपेणैवान्यस्यबोधनं।अ
त्रचविषयेविषयिवाचकपदस्यलक्षणयाशक्यतावच्छेदकमात्रप्रकारकलक्ष्यविशेष्य
कबोधनंकार्यंतावच्छेदकमताशक्यासाधारणधर्मस्यलक्ष्यासाधारणधर्मस्यचभानाभानयो
र्नविरोधः।परेतुमात्रविशेषणंनदेयंतेनलक्ष्यासाधारणोपिधर्मोभासतइत्याहुः।केचित्तु
लक्षणयालक्ष्यासाधारणधर्मप्रकारेणैवबोधःअनंतरंचव्यापारांतरेणशक्यतावच्छेद
कप्रकारेणलक्ष्यबोधःइत्याहुः।बाधज्ञानस्यचयथानप्रतिबंधकत्वंतथोक्तंप्राक्।अत्र
चैकपदोपात्तत्वान्नोद्देश्यविधेयभावः।उदाहरणं।कलिंदगिरिनंदिनीतटवनांतरंभासयन्स
दापथिगतागतश्रममरंहरन्प्राणिनां।स्फुरत्कनककांतिभिर्नवलताभिरावेल्लितोममाशु
हरतुश्रमानतितमांतमालद्रुमः।अत्रतमालेनभगवतोनिगरणंकलिंदनंदिनीत्यादिभि

तीर्णीचरणत्रयगतानि विशेषणानि तदनुग्रहार्थं विषयविषयिणो साधारणधर्मत
पाशा द्वाऽपा —ज्ञानिचतुर्थमपिचरणगतमवैयाकरणानां दर्शने वैयाकरणानां तूपा
तमालाभिन्नकर्तृकपाश्रमदरणक्रियायोन्नीतंताइशक्रियाकर्तृत्वंतद्यातयास्थितं द्विती
येवरणेचोर्वंवचयोनिसंचरणस्यायथ्यादिनाटलीयेपिलताभिगोपीनांनिगरणंतासिन्नेत्वा
नुग्राहकतया ऐवंवत्तावपथगेपमतिशयोक्तिः यत्रचानुग्राहकंनेनिगरणमंकिंतु शुद्धसाधा
रणधर्मादिमानिरवपदायथानयनाने इसंदेहतं द्विलीकरण —मातिरपत्ताश्चसंतापका
पिकादंविवीमम अत्रभगवतोमूर्त्तिर्मिगीर्णानामाथ्यपारभेदसर्गेण विशेष्यविशेषणभा
वसम्बन्धसन्ततपाक्रपकेताव— द्विवितोविषयविषयिणो ह्लेनसंसर्गे विशेषणविशेष्यभा·
वेनतत्रप्रकृते विषयितावच्छेदकरूपेणविषयस्यैवभानादभेदसंसर्गप्रसक्तेः अभेद

व. प्रधानात्रातिशयोक्तिरिति प्रवादस्तु प्रागुक्तसंसर्गारोपरूपकस्यैव विषयितावच्छेदकस्यैव
ग. भेदाभावरूपतया निर्वाह्यः तच्च विषयितावच्छेदकं क्वचित्प्रकृते निगरणादार्ढ्याय विषयमा
२२ त्रवृत्तिधर्मत्वसमानाधिकरणधर्मेणान्यतात्वाभ्यां प्रसिद्धं यथा कुलिंदनगनंदिनीत्यादौ तमालत्वा
दि क्वचिदप्रसिद्धमपि कल्पितोपमादावयमानमिव काविना स्वप्रतिभया कल्पितं धर्मिणइवयम
स्यापि कल्पनायामविरुद्धत्वात् यथा स्तनापितरूणगनये यथा वा जगज्जालं ज्योत्स्नामयपनवैर्धाभि सु
जैटिलयन्नंजनानां संतापं विविधमपि विधमपि मधः प्रशमयन् स्मितोद्वृंदारण्यपनन्ननिविलष्ठे
दारकन्तोममसंतांतध्वांतेतिरूपोत्तनवीनोजलधरः अत्र विषयधर्मविशिष्टतया कल्पितेन लो
कोत्तरजलधरत्वेन रूपेण भगवतः प्रतिपादनेन तत्समानाधिकरणत्वेन कल्पितानां वि
शेषणानामनुगमः एवं च निगरणे सर्वत्रापि विषयितावच्छेदकधर्मरूपेणैव विषयस्य भा २२

नेन विषयाभिन्नत्वेनेतिः स्थिते रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानन्तु स्तुत्वा रूपकवि·
शेषणं रूपके दार्शितानां विधानात् सिद्धापि संभावोक्तीत्यतिदेशेन प्रदर्शनार्थं तेनाऽन्यापि भेदा
तिशयोक्तिः स्यादर्थातिशयोक्तिरिति द्विविधं कुवलयानन्दे यदुक्तं तन्निरस्तमिति न व्याः एषांच
स्त्र रूपक इवा — पि विषयाभेदो भासते परं तु निगीर्णे विषये रतिरूपकारस्य विशेष·
य्याध्यवसायस्य सिद्धत्वेनाप्रधानत्वान्निश्चयात्मकत्वाच्च साध्याध्यवसानायाः संभावनात्म·
केत्युत्प्रेक्षायां वैल — एयमित्याहुः कथं तर्हि कमलमिदमनंबुजातं जयति तमीकनक
लतिकायामित्यादौ विरोधोद्विषयतावच्छेदकस्योल्लेखस्यानिगरणमिति चेन्न। तदिदमि
त्यकमलत्वविशिष्टविशेषस्यापवातिशयोक्तेरुद्देश्यतावच्छेदकत्वेन रूपमेव एवं गौरवमा
युरेवेदमित्यादावपि बोध्यं अत एवातिशयोक्तावभेदोऽनुवादापपवन विधेयतातिशयाद्युक्ति

र० संगच्छतेएवमेकःप्रकारोतिशयस्ययत्रभेदेप्यभेदः अयप्रकारांतरंयत्राभेदेपिभेदोलोकोत्तरत्वमि
स तियस्यार्थः इदमेवप्रस्तुतमस्यान्यत्वमित्यनेनोक्तं इदा॰ अस्याजगद्धित्तमपीमनसः प्रवृत्तिरन्यैव
२०२ कापिरचनावचनावलीनालोकोत्तराचकृतिराकृतिरापस्याविद्यावतांसकलमेवचरित्र
मन्यत् एवमन्यः प्रकारोयत्रासंबंधेपिसंबंधोवर्णोत्कर्षार्थंयथाधीरध्वनिभिरलंतेनोयदेमेमासि
कोगर्भमन्मदवाणगुत्थामध्येजठरंसमुलति अत्रसिंहीवचनेसमुच्छलनासंबंधेपिसमु॰
च्छलनसंबंधोक्तिशौर्यातिशायिकायथावा॰ गीर्देवमाकर्णापितेयदीपामदारसंजेरनु॰
भावनीयांसमीहतेनित्यमनन्यचेतानभःखदात्मभंविशनेतायथावातिप्रवेशारदचैरिरता
रकाः कमलविद्रुमचंपककपोरकाः यदिमिलतिकदापितदाननंखलुतदाकलयातुलपा
मेरुः सर्वत्रनिर्णीयमानश्चहतसंभाव्यमानइतिविशेषः तथान्यप्रकारोयत्रसंबंधेप्यसंबं २०२

यः यथापीयूषपङ्क्त्यामपि तेगीरं निपीतवतां तोषापकल्पते नोपोषाधरा विंवमधुरिमोद्रे
कः अत्र तेषां असंबंधेप्यसंबंधः एवमेवान्योपि प्रकारोपन्नप्रयोजकस्यापायोन्यस्य चपौर्वापर्यवि
पर्ययविपर्ययः सच द्वयो सहभावत्प्रयोजकस्यास्प्रयोज्यानंतरभावाद्वेतिद्वेध आद्यो यथा
प्रतिक्षुभ्यतिकरशिलातलसंघट्टसमुच्छलद्विगुद्वल्लीकृतविस्फुलिंगच्छटापटलानां वा
भिन्नामिति द्वयवर्णने अत्र समुच्छलनविपर्ययद्वल्लीकरणयोः सहोत्पः त्तिर्गम्यते द्वितीयो य
था युष्मत्प्रतापदहनात्क्षितिभूपतीनां भवंति भूवल्लभ भस्मशेषाः अत्रनंतरं तेभ्य कुठीविटं कात्स्कर
तिशेषानलविस्फुलिंगाः अत्र भेदद्वयप्रयोज्यन्यातिशयकृतः प्रयोज्यशेष्यातिशयोग
म्यः एवं चैतद्भेदपञ्चकात्मकत्वमतिशयोक्तेः सामान्यालंकाराणामिति प्राचीनाः अन्येतु
संबंधेप्यसंबंधः असंबंधेसंबंध इति भेदद्वयं नातिशयोक्तिः एतादृशातिशयस्य प्रक

र ग २०५

204

दीपकोपमायरूप्यादिषु स्वभावोक्तिभिन्नेषु प्रायशः सर्वेष्वप्यलंकारेषु सत्वात् न हि यथा श्लिष्टव
ल्लक्षावल्लिकाविच्छित्तिः कार्यकारणयोर्वा पौर्वापर्यविपर्ययस्याधिते नैव स्वाभूतपाभेदातरता नायते श्च न
स्मादिविषयिणां निगीर्णाध्यवसानं न विषयस्य तस्यैव वाच्यत्व यथादिशब्दैरसंस्पर्शविनोदस्य कस्यन कार्य
कारणयोर्वा पौर्वापर्ये श्लेषेतदन्यतमत्वमतिशयोक्तित्वमिसाडः नव्यास्तु निगीर्णाध्यवसानमेवातिश
योक्तिः प्रभेदांतरं त्वनुगतरूपाभावादलंकारांतरमेव ननु प्रस्तुतानामपभेदेनाभेदस्य असंबंधे संबंध
इति भेदे संबंधेनासंबंधस्य संबंधे असंबंध इति भेदे असंबंधेन संबंधस्य कार्यकारणयोर्वा पौर्वापर्यविपर्य
ये च तैनैवानुपूर्वस्य च निरासरणं रत्नाकरविमर्शनीकारायुक्तप्रकारेण संभवतीति चेत् न अन्यत्वा
देभिरनन्यवस्तुप्रतीतेरेव चमत्कारित्वेन तत्र अनन्यत्वादिभिः तेषामननुभवात् संगतेन वानन्तमत्वमनु
गतमतिशयोक्तित्वं विच्छित्तिविशेष — ऐणसदृशप्यनन्यतमत्वस्याप्रयोजकत्वात् अन्यथानुपमाद्रूप २०५

क्वादिकतिपयानांतमत्वंसकलानांतमत्वंवातल्लक्षणागुणमादायस्सन्तद्भेदाश्चेत्येवकिंनब्रूयाः अ
लंकारांतरत्वेगौरवमित्यपिनवाच्यं॰ तद्यत्राकृतस्यपदार्थकल्पनेनैवगौरवंस्यात॰ प्रधानतावार्थकतानुपपत्त्या
लंकारत्वस्यत्वयापिस्वीकारादलंकारविभाजकोपाधिपरिगणनस्यचपुरुषपरिकल्पितत्वादित्यपि
वदंतिगगनचरंजलबिंबकद्यमिवस्पृशंतिवदंतिविद्वांसः दशरथचत्वरचारिहृज्ज्वरहारीविधुस्तपरि
पूर्णः इत्यादौविषयिणास्वाभाविकस्यानिगीर्णत्वेन इत्यध्यवसानातिशयोक्तिः ॥ यत्तुकवलद
नंदेयथापह्नवगर्भत्वेसैवसापह्नवातिशयोक्तिस्तथाराजन्यौतौ॰ पश्यंतितांविथावितत्रपर्यस्ता
यंद्रतिगर्भामतिशयोक्तिमाहुः तच्चिंत्यं —यंत्वापह्नुतित्वेनप्रामाणिकसंमतमितिप्रागेवोच
दनात् यदपितेदेवोक्तसंबंधातिशयोक्तिस्यादयोगयोगकल्पनेतंसोधाग्रासिधुरस्यास्पृशति
विधुमंडलमितितदपिन ग्रंथैवस्पृशंतीवेंदुमंडलमितिकृतेकोलंकारः उत्प्रेक्षेतिचेत॰ तर्हीवा

र. देशाभावात्तस्मिन्मेदेप भुक्तिनाशवादिमते पावाच्योत्यत्र कामैवेवाभावे गम्योत्यत्रैहेति नियमस्य सर्वसंमतत्वात्तत्व
स. कीर्तिर्भ्रमणश्रांता विवेश स्वर्गं निम्नगामिति त्वड्रूपगम्यो त्यत्र पाः मैथाग्नीनीत्यस्य चोत्यत्रक्रांशे
२५ विशेषानुपलंभात्तथा हि त्वत्कीर्तिरित्यादौ वक्तृद्रुगसत्ते स्वर्गगमने वा स्वर्गगाप्रवेशतात्पर्यमाद्यत्य
205 कैतिनैषस्वर्गसंबंधित्वरूपानुपात्तधर्मनिमित्तेयं कीर्तिः स्वर्गगा कर्मकर्तृवेशकर्तृत्वोत्यत्रकैतिनेपेता
दृशमनतृपात्तधर्मनिमित्ता विशेषणीभूतभ्रमणाभ्यांतत्वरूपटेत्तत्ये हेतिनपेक्षतादृशगमनतादा
त्म्याध्यवसितस्वर्गगाप्रवेशरूपोपात्तधर्मनिमित्तेति सर्वथात्समेव मैथाग्नानीत्यत्र परमोर्ध्वदेश
संयोगे चंद्रमंडलस्पर्शतादात्म्योत्यत्र क्रियायां परमोर्ध्वदेशावृत्तित्वरूपानुपात्तधर्मनिमित्ता तादृश
स्पर्शकर्तृत्वोत्यत्र क्रियायां तु परमोर्ध्वदेशसंयोगरूपानुपात्तधर्मनिमित्तेति द्वयमपि गम्योत्यत्रैहेवतस्मा
दुत्प्रेक्षासामग्री यत्र नास्ति तादृशस्थले दृष्टानुचितं यथास्मदीयं धीरध्वनिमित्तादिसंदर्भेत्वसत्त्व श्री

२०५

चमत्कारकत्वमलंकारसामान्यलक्षणमिदमपि नविस्मरणीयं॥ इयं चातिशयोक्तिर्वेदेऽपि दृश्यते
यथा॥ द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो
अभिचाकशीतीति स्मृतौ च॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमी यस्यां जाग्रति भूतानि सा
निशा पश्यतो मुने॥ यथा वा स्मृतिः देवत्वदर्शनादेव लीयते गुणपराशमः किं वादर्शनतः पापम
शेषमपि नश्यति॥ गुणपापयोर्यथा स्वस्वं दुःखभोगमात्रनाश्यतया दर्शनादर्शनाभ्यां तज्जन्यसुखदु
ःखयोरपि शेषशब्दाभ्यां च जन्मशतोपभोग्ययोरेवाहे पादग्निपाभ्यां पूर्वयोर्निगरणं व
ज्यते न च पूर्वाभ्यामग्निमपोरेव निगरणं किं न स्यादिति वाच्यं नाशकसामान्यस्य नाश
कतावच्छेदकावच्छिन्नत्वनियमस्य स्वापेक्षया तन्निगरणासंभवात्॥ उपमानेन महत्ता
त्वदः स्योपमेयस्य महत्त्वाधान यनिगरणं स्योचितमाचा॥ एतेन तद्व्याप्तिमहादुःखत्वादि

र॰ काव्यप्रकाशो व्याख्यातः इति रसगंगाधरे अतिशयोक्तिप्रकरणं अथ तुल्ययोगिता प्रकृताना
गं॰ मेवाप्रकृतानामेव वा गुणक्रियादिरूपैकधर्मान्वयस्तुल्ययोगिता। औपम्यं चात्र गम्यं तत्प्रयो
२०६ जकस्य समानधर्मस्योपादानात्तद्वाचकाभावाच्च अत एवालंकारिकाणामपि सादृश्यं पदार्थां
तरेण तत्साधारणधर्मरूपमिति विज्ञायते अन्यथौपम्यस्यानुगम्यत्वोक्तेरनुपपत्तेः केचि
त्तु सादृश्यमभाव एवातिरिक्तः सादृश्यं तु तत्साधारणधर्मात्मकमेव सैव वादिपदानां शक्यतावच्छेदकः
छेदकः न तत्साधारणधर्मवाचकत्वं तत्साधारणधर्मस्य स्वशक्यतावच्छेदकत्वं तद्धर्मरूपेणावो
धनेपि सादृश्यभावरूपेणावबोधो व्यंजनसाध्य एवेत्यपि वदंति । उदाप्रिये विषादजडाहिति
वाचं प्रिये सरागं वदति प्रियायाः वारामुदारा विजगाल धारा विलोचनाभ्यां मनसश्च मानः
अत्र मानिन्या वर्णितत्वान्नदीयत्वेन प्रकृतयोः कन्योर — मानन्योर्विगलनक्रिया समान २६

धर्मित्वेनोपात्ता विलोचनमनसोरुपादानयोश्च ‿क कारणं सर्वेषामपि क्रियात्वयस्य तस्य
त्वात् एवं च तद्गुणो क्रियानुरूपधर्मिको ऽपि द्वयोर्द्वयोरुभयोर्यस्मं प्रतीयते न परस्परं च तद्गुणं तद
पादानत्वं तत्कर्तृत्वरूपविशेषसामान्यस्य पर्यवसानात् शेषमुपरिष्टाद्बोध्यं संचलति वय
सि प्रथमे समुद्रवति किंच तद्गुणानि निरूप्याः उल्ल‿ तिकापि शोभा वच सा च दशा च वि
भ्रमाणाच ग्रन्थगुणाः यदि च विलसत्स्मिककथा वाचो गतयश्च विभ्रमाश्च भृशमितु
तरार्थं तयदि दधति स्म मुग्धिमाणं वाचो गतयश्च विभ्रमाश्च भृशमिति क्रियते तदा गुणा
विशिष्टा क्रिया केवलगुणेन साक्षात्संबन्धाभावात् केवलक्रियायाश्चाहृदयत्वात् अप्रकृता
नोमेव यथा संचलति वात्येषु दृशाः समुद्रवति गंडस्थलीष्विवाडिमानि मालिन्यमाविरासीद्
कापि पल्लवलिकनकानां ग्रन्थगुणाः आविर्भावक्रियायाः साक्षादिमिश्रिरनन्वयात् सं

र॰ वति राकापि पल्लवलीपुरस्तं चपुंडरीकंचेतिकृतेक्रियायाथवलीमवत्सद्वदितंलवलीकनकंकला
ग॰ निपिंक्षायमितिकृतेगुणविशिष्टक्रिया त्वयियाकशामनस्रमेशासतिसकलवसुंधरा
वलयं विपिनेरिवधूना नांवर्षतिविलोचनानिचनानिच अत्राभयसाधारणयोर्गुणक्रि
२०७ ययोरभावाद्धृष्टमात्रेश्लेषमूलेनाभेदाध्यवसानेपिटीकृतोर्थोवा त्यत्वलंकारसर्वस्वकृ
२०७ तातदनुगामिनाऽवलयानंदकृतावगुणक्रियाभिः संवद्धत्वेगुणक्रियारूपेकयमीत्वप्र
तिचोक्तंतद्यथाततः शासतित्वयिदेराजन्नखंडावनिमंडले नमनागपिनिश्चिंतेमंडलेश
त्रमित्रयोरित्यत्राभावरूपस्यैवधर्मस्यान्वयात्गुणक्रियेत्युपलक्षणंवाधर्ममात्रस्य एवंपृक
त्त्वदानशीलोसिभत्सर्थिषुतथार्थिविसादावपिदानशीलरूपेकान्वयाल्लक्षणप्रवृत्तिः यथाकथं
चिदनेकंवेकान्वयस्यचमत्कारित्वोपेतित्वात् एतेनद्विताद्वितेवृत्तिनोस्समयरात । २०७

स्ययोगीतावरीपतेपराभूतिर्मित्रशात्रवयोस्समभेत्यादिनातुल्ययोगितायाःप्रकारांतरंयत्कुवल
यानंकृतालक्षितमुदाहृतंनेवतन्मयालक्ष्यम् अपिवर्ण्यानामितरेषांवाधर्मैक्यंतुल्ययोगीतेति
पूर्वलक्षणाक्रांतत्वात् एकानुपूर्वीबोधितवस्तुकर्मकदानयानत्वस्यपरंपरंपातात्शशात्क
स्यप्रागुक्तमार्गेणार्थस्यवाधर्मस्यैक्यात् पद्मानिबंपरस्तुनापश्चिनेमधुमर्पिषाद्यश्चैनेयमास्या
यैःसर्वत्रकटुरेवमत्स्यस्तत्रापिकटुत्वविशिष्टस्यनिंबस्यैवपरंपरयाच्छेदकस्यचकस्यजनकधर्मत्वम
भवात् नचात्रहृत्तिनियामकसंबंधेनधर्मित्तृत्तित्वंविवक्षितंमस्यवक्ष्यमाणकारकदीप
कस्याकाव्याप्त्यापत्तेः अथचंद्रश्वबद्धरंरम्यमित्याद्युपमायांचंद्रमुखयोरेकधर्मात्व
मात्रेणव्याप्तिनचात्रप्रकृतानामेवाप्रकृतानामेवेत्युक्तत्वान्नतथेतिवाच्यंप्रागुक्तेपिपेवि
पदमितिपयेजगालेमानात्स्मदयादच्छ्याविलोचनाभ्यामिववारिधारेत्युत्तरार्धेकृतेप्रकृत

र. कयोर्मानवारिधारयोरुपमायां तथाप्यतिव्याप्तेः चंद्र इव सुंदरं मुखमित्रापि वक्ष्यमाणदीपकल
ग. क्षणातिव्याप्तेश्च नचोपमेयस्य गम्यत्वे सतीत्यपि विशेषणीयमिति वाच्यं चंद्रोऽस्तु निर्मलं वारिचंद्रो
२०८ हंसस्समयातिः हंसास्तु शरदिस्मेरपुंडरीकमनोरमा इत्यत्र वाचकाभावादुपमायां तथाति
208 प्रसंगात् यदि चात्र न तथा उपमा किंतु समासस्य वाच्यापूर्वपदस्य लक्षणैवेति सूक्ष्ममीक्षणेन त
थापि हंसास्तु मानसभुवश्चंद्रा इव न संशय इत्यादिरूपकादिष्वतिप्रसंगः न ह्यत्रापि चंद्रादिसा
दृश्यपि विशिष्टचंद्रादिपदानां लाक्षणिकत्वादुपमालक्ष्यैवेति शक्यते वक्तुं रूपके लक्षणा
नास्तीति मार्गेण प्रतिपादनादिति चेत् न यत्र यथोक्तानां धर्मिणां यथोक्तधर्मत्वप्रपंच
मत्कारी तत्र तत्सयोगीता दीपकं वा तत्वे दीपकमन्यथा तु तत्सयोगीतैव यत्र क्रिया साथा
थकणो धर्मस्तत्र यावतां कर्त्रादिकारकाणां संनिधानं तेषां स्वसजातीयतान्येन सदृशस्ता २०८

योगितादीपकं वा ॥ अथ कारकदीपकम् ॥ भगवति प्रौढप्रतापे पि द्विगैवभासमानत्वात् यथा सज्जनाः परो
पकारे स्फुराः प्रासंगवयनं कृपणाः ऊलवतो मंदाक्रांताः प्राणासपपवर्गं चेति अत्र कर्तृकर्मणोः
एवं वक्ष्यमाणे लावण्येन प्रमदेत्यत्र कर्तृकरणयोः अमुनैव न्यायेनानेकासां क्रियाणामेककारका
न्वये कारकदीपकं । यथा वसुदातं यशो धातुं विधातुमरिमर्दनं जातं चुम्बमाहृश्यान् राज
न्नातीव निपुणो भवान् अत्र हृतिहीनस्य कस्य चिद्दीनस्य वचने वसुदानयशोधानलक्षणयोः क्रि
ययोः प्रकृतयोररिमर्दनस्य वा प्रकृतस्य यशोधानस्य वोभयोरात्मनः साधारणं कर्तृकारकं ।
यथा वा वासपतिहीनमत्वानतिसत्वान्हहता स्वित्विवाहमति ज्ञासपतिसकलशत्रूनीति ।
विदामग्रणीर्नरायिपतिः अत्र कस्य चिद्दीनसत्वस्य सत्वाधिकमसहमानस्य वा शत्रुपरिपीडि
तस्य वा कस्य चित् राजानं कं चित्प्रस्तुतो सामान्यस्य विशेषरूपाप्रामप्रस्तुतप्रशंसापामेर

रं. कस्याः क्रियायाः प्रकृताप्रकृतरूपोभयाप्रकृतयोर्धारणंतत् पदत्तप्रायस्त्वकृभिन्न-
ग. स्यकस्यचिद्वाजस्तोत्रवर्णीतिमात्रवोधकस्यवेपमुक्तिस्तदाक्रियाणांप्रकृताप्रकृतत्व-
२०८ यत्वाभावात्तस्ययोगीतेव यत्तुसकृद्वृत्तिस्तुधर्मस्यप्रकृताप्रकृतात्मनां सैवक्रियासु
वकीर्णकारकस्येतिदीपकमितिलक्षणमुक्त्वाकिणतिकणतिवेल्लतिविवलतिनिमिषतिवि-
लोकयतितिर्यक् अंतर्नंदतिचुंबितुमिच्छति नवपरिणयावधूः शयनेइतिद्वितीयदी-
पकमुदाहृतंकाव्यप्रकाशकृद्भिः । तत्रविचार्यते प्रथमार्द्धगीतलक्षणेनैवदीपक
त्वंकृद्भिः यस्यापिसंग्रहाहीतीलक्षणंव्यर्थंगुणानांकारकाणांचगुणक्रियारूपधर्मस्ये
वक्रियाणामपिकारकरूपधर्मस्यसकृद्वृत्तेः साम्राज्यात् नचक्रियाणांप्रकृताप्रकृता
त्मताविरहेपिशुद्धप्रकृतत्वेशुद्धाप्रकृतत्वेपिवाकारकस्यसकृद्वृत्तेदीपकत्वंक्रियाभिन्ना

२०८

नांतप्रकृतानामप्राणामेवक्रियादेर्धर्मस्येति वेलत्त्वरापालक्षणद्वयमिति वाच्यं कारकतुल्ययो·
गीतोच्छेदापत्तेः सकलालंकारिकसिद्धांतविरोधापत्तेश्च लक्षणद्वयस्यानन्तगजत्वाच्चतादृ
शलक्षणद्वयान्यतरवत्त्वास्य पन्नचतादृशधर्मान्वयप्रयुक्तं सादृश्यमभेदो वत्तद्वोपमारूपका
दिकमेव अलंकरताप्रयोजकं सुंदरत्वेसत्युपस्कारकत्वमित्यसकृदावेदनात् अन्यथासादृ
श्यस्यात्रमत्स्यपात्रदाराणोपमाव्यवहारस्याद्यापत्तेरिति दिक् एवं वदधीविवलिकर्णेभहि
महेमाचलाद्विषु अदात्त्वमर्थे यं वंहृष्टे भवति भासते शत्रादो रक्षानारूपेषायथासंख्यावष्ट
न्याहृष्टः सदसि चेद्ग्राः स्वं इवं वदनचंद्रिकाः अयत्वसगर्वेसौम्याःशेषकालानलाब्धयस्तत्रच
सदृशपद्द्वयेनराजविषयकरतिभावभूषणात पाद्दिता पन्नचप्रकृतानामेवाप्रकृतानामेव वा क्रिया
णामेककारकान्वयः साकारकतुल्ययोगीता यथा वसुदांतयशोयातं विख्यातमरिमर्दन॰ त्रा

र॰ गं॰ ६९

210

तेवसकलांपृथ्वीमतीवतिपूणीभवात् अत्र राज्ञःस्नातकवाक्ये प्रकृतानां क्रियाणामेकेनक
र्त्रा साधारणेन धर्मेणैवपम्यं। यथा वा दूरीकरोति कुमतिं विमलीकरोति चेतश्चिरंतनमघं चुलु
कीकरोति भूतेषु किं च करुणां बहुलीकरोति संगः सतां किमु न मङ्गलमातनोति अत्रार्थांत
रन्यासानुक्तिकिपिसमरसंतु सरोति च केविदन्ये पशुपतिपुरापपुरुषाः कतिचस्पृशन्ति मातर्मुरारि
चरणांबुजमाधुरीं गंगे भागधेयाधिकां कतिपये भवतीं पिबन्ति अत्रैकं कर्मक्रियाणां साधारणं धर्मौपा
म्यं यथा अपेलिलाभग्नत्रिपुरहरकोदंडमहिमहिमस्कथापत्रादंचत्पत — लवलयैर्यस्सभव
तः अयं कोवा तत्र प्रस्मरफणाकोणानिहिनहितिः शेषः श्रीमान् कमठकुल चूडामणि
रपि अत्र कोवाडस्पनेनवाच्यलस्य व्यतिरिक्तस्यागणनीयत्वस्य शेषकमठभ्यामप्रकृताभ्या
भ्यामन्वयः प्रतीयते इति रसगंगाधरे तुल्ययोगितामुकरणं अथदीपकं प्रकृता॰ २१०

नामप्रकृतानां चैकसाधारणधर्मान्वयो दीपकं यथा देवाज्ञायोयमस्यागमस्तेप्रकृतार्थमुपातो
धर्मः प्रसंगात्प्रकृतमपि दीपयति प्रकाशयति संदरीकरोतीति दीपकं यदा दीपश्चदीपकं संज्ञा
पकं भूदीपसादृश्यं च प्रकृताप्रकृतप्रकाशकत्वेन वोध्यं उदाहरणं श्रमस्तस्य चंद्रिकायां ललिता
याश्चापि कवितायाः स्रतजनस्य च निर्माणं जनयति नहि कस्य संतोषं यथा वा स्वधायाश्चंद्रिका
याश्च संजीवितिनाम महौषधे दयार्द्रेष्टेश्च तेराजन्विश्वसंजीवनगुणं यथा वा मतस्य लिप्साकृपाण
स्पर्दिता विमार्गगा याश्च नूचिः स्वकांतसर्पस्य शांतिकृत्खलस्य मैत्री विधात्र स्पष्टेन दृष्टिदृष्टस्वा
श्रयाभावसाधारणधर्मः कस्यचित्प्रकृतलक्षणत्वे गौरवाद्यप्रसंगाच्च एवं च सिद्धेयत्ति कु
पतीत्याद्युदाहरणमपि न संगच्छते क्रियाणां शब्दप्रकृतत्वात् किंच दीपकत्वस्य योगित्वादौग
म्यमानमौपम्यं जीवातुरिति सर्वेषां संमतं नचात्र खेदनकृतादीनामेककारकान्वितानामौपम्यं

र॰
गं॰
२१

पर्यंकविस्रंभगोचरः तस्मात्समुच्चयालंकारच्छायान्नोचिता अस्मदुदीरितानां चुम्बदानादीनां
हीनमनादीनां च रागजनकत्वे कारणानां पर्युपगतानामौपम्यप्रतीतौ सहृदयहृदयमेव प्रमाणमि
ति न प्रतिवंदितानावसरः यदि तु खेदनादीनामौपम्यं प्रतीयत एवेत्याग्रहस्तथापि क्रियाणां सु
दृष्टकृतत्वात्तुल्ययोगितास्यादपि न तद्दीपकमित्याकूतं तावत् यदपि विमर्शीकृतोदाहरणे आ
लिंगितं शशिमुखीं च मत्थां चपातकीर्त्तिं च साधयितुमर्जयितुं च लक्ष्मीं त्वद्भक्तिमद्भुतरसां हृदये वक
र्त्तुं मंदादरं जनमहं पशुमवमन्य अत्रालिंगनाद्यनेकक्रियाकर्तृत्वेनैकपदजनो निर्दिष्ट इति तदपि
चिंत्यं आलिंगनादीनां क्रियाणां मंदादरत्वेनैकाश्रयत्वस्यावश्यकत्वेऽपि परमेकाश्रयत्वस्यानाव
श्यमेकाश्रयत्वस्यानावश्यकत्वात् यशोशामुखीमालिंगितं यद्युस्तधांगतेयोपि कीर्त्तिं साधयि
तुं यश्च लक्ष्मीमर्जयितुं यश्चापि त्वद्भक्तिं कर्त्तुं मंदादरस्तं सर्वमपि जनं पशुं मन्ये इति तु ॥ २१ ॥

भूतं तानां भिन्नकर्तृत्वेष्युपपन्नेरेकाकारकान्वयकृतं क्रियाणामौपम्यं वप्रकारीतिन शक्यते वक्तुं
किंतु शशिमुखीसुधाकीर्तिलक्ष्मीत्वद्भक्तीनां विविधमतिविविंभावकृतं नापि यात्रे कर्तृकत्वेका
चिदर्थस्याक्षिपरिपुष्टिः प्रस्तुतशान्तिकृत्सर्वेषां यशस्त्वोक्तपेक्षापास्तकत्वात् हृश क्रिया
करणमंदादरस्यैकस्यच्छ्रुत्वोक्तेरमणीयत्वात् यदि तु विमर्शनीकारोति त्वं शंपसमर्पणीये
माथ्यहत्वदेथसमर्थ्यतो क्रियाणां कर्तृरेकत्वाभावेपि कर्तृरेकान्तवच्छेदकस्य मंदादरत्वस्यैका
त्तस्यैव वपरंपरासंबंधेनानेकक्रियासाधारणत्वमस्य सकृद्वृत्ति रस्तीति न दोषः कारकस्यैव
कारकविभाजकोपाध्यवच्छेदकस्यापि सकृद्वृत्तेः कारकदीपकत्वेन परिभाषितुं शक्यत्वात्
कारकसकृद्वृत्ते स्वस्वामिकृत्यमेवोदाहरणमनुसर्तव्यं अत्रेदं बोध्यं तुल्ययोगितातो दीप
कं न स्थयकभाव महेति धर्मसकृद्वृत्तिमूलायाविच्छित्तेरविशेषात् विच्छित्तिवैलक्षण्यएप से

र० वालंकारविभागहेतुत्वात् न च धर्मस्य सकृद्वृत्तेरविशेषे धर्मिणां प्रकृतत्वाप्रकृतत्वाभ्यां प्रकृता
ग प्रकृतत्वेन च तुल्ययोगितायां दीपकस्य विशेष इति वाच्यं न वापि तुल्ययोगितायां धर्मिणां के
२१२ वलप्रकृतत्वस्य केवलाप्रकृतत्वस्य च विशेषस्य सशेष इति वाच्यं न वापि तुल्ययोगितायां धर्मि
णां केवलप्रकृतत्वस्य केवलाप्रकृतत्वस्य वा विशेषस्य सत्वादलंकारद्वैतापत्तेः श्लेषेपि द्वैतापत्तेश्च सर्वे
षामप्यलंकाराणां प्रभेदैर्लक्षणायाह्वैलक्षण्यापत्तेश्च न च दीपके वास्तवमौपम्यं गम्यमुपमे
योपमानयोः प्रकृताप्रकृतरूपयोस्तत्र सत्वात् तुल्ययोगितायां चैवेति उपमानोपमेयभावरूपा
भावादतो वैलक्षण्यमिति वाच्यं उपमेयोपमानत्वयोः प्रकृताप्रकृतरूपत्वे मानाभावात् ॥
त्वामिव वर्जं जन्तमिव रघमित्याद्युपमेयोपमायां गत्यैव चौपम्यानापत्तेश्च तस्मात्तुल्ययोगिता
यां पर्यवसितप्रकृतानामेव धर्मस्य सकृद्वृत्तिरप्रकृतानामेव अप्रकृताप्रकृतानां वे २१२

त्ति एवं प्राचीनानां तुल्ययोगितातो दीपकस्य पृथगलंकारत्वमाचक्षुस्तावणानां तु द्वयोरुहमात्रमि
तित्नव्याः अमुंवालंकारधर्मस्य गुणक्रियायात्मकस्यादिमध्यावसानगतत्वेन त्रिविधमाम
नेति यथा॰ न भाति रमणीयोपि वैराग्येण विना पतिः वैदुष्येण विना विप्रो नवलोकस्त्वपा
विना लावण्येन मस्समदातिरेकेण वारणोपि पतिः भाति विभवेन भवकाम्रराजन्न् भव
तावत्तुम्हमतीवलघं आखंडलेन नाकः ऊकालकुंडलेन पाताले नरमंडनविभुर्खरतभ
वताभूमंडले विभाति नमाम् एवं तुल्ययोगितायामप्युक्तं वस्तुतस्तु धर्मस्यादिमध्यांत
गतत्वेपि चमत्कारवैलक्षण्याभावात्त्रैविध्योक्तिरापातमात्रात् अन्यथा धर्मस्य उपाधयम
कधर्म्यैवत्वकारणतया एकधर्म्यैत्वं च ति· एवं त्रिविधेस्मिन्नाद्ययोर्भेदयोर्गुणानां

श्री०
३३६

गुणक्रियाणां वा तृतीये रमणीया नाम रमणीयानां रमणीया रमणीयानां संबन्धः नवास्मिन्वत्र
माणासमाध्यलंकारत्वमाशंक्यं। समाधौ हि एकेन कार्ये निष्पाद्यमानेप्यन्येनाकस्मिकमापत
ताकारणेन सौकर्यादिरूपातिशयो यत्र संपाद्यते स विषयः अस्मिंस्तु समुच्चयप्रभेदे पत्रेकं
कार्यं संपादयितुं युगपदनेके खलेकपोतारवाहमहमिकया संपतंति कार्यस्य च न कोप्यति
शयः सं: मेणोदा। प्रादुर्भवति पयोदकज्जलमलिनं बभूव नभः। रक्तं च पथिकहृदयं कपोल
पाली मृगीदृशः पाण्डु:। उदितं मण्डलमिन्दो रुदितं सद्यो वियोगिवर्गेण। मुदितं च सकलयुव
जनचूडामणिशासनेन मदनेन। अत्राद्ये गुणानां द्वितीये क्रियाणां च यौगपद्येन भिन्नधर्म्य
न्वयः आताम्रो सिंधुकन्याधवचरणनखोल्लासिकांसिकांतिच्छायाभिन्नर्यो तन्त्राजालेजीरानां
त्रिपुरविजयिनो जातजांबूनदश्री: स्वाभाव्यादच्छमुक्ताफलरचितलसत्कुच्छसच्छायक

र॰गं॰ ३३७ यापास्यायासजालालारमरसरिद्धवव्रातजातश्रमान्तः । दे वृत्वांपरितस्कवंतु कवयो लोभेन किं ताव
तास्तव्येरत्नभविनोसिपस्यतहणश्चापप्रतापोधुना । क्रोशंतः कुरुतेतराव सुमतीमाशासमा
336 लिंगतिधांचूंबत्यमरावतीचसहसागच्छत्यगस्त्यामपि । अत्राधिगुणमेकधर्म्यवयः पद्यपिह
रिचरणनखसंसर्गसमयेनास्ति हरजयसंसर्ग इति क्रपीतवर्णायोर्योगपद्यस्यासंभवस्तथापि
साहजिकश्वैत्येन सहतयोः प्रत्येकं तस्य संभवोस्त्येव निंतदोषः । समुत्पत्तिः पद्मारमणपदप
द्मासेन स्वात्रिवासः केदर्पप्रतिभटजटाजूटभवनं । अथापं व्याधंगः पतितजननिस्तारणविधे
नेकस्मादुत्कर्षस्तवजननि जागर्तु जगतः । अत्रत्रिषु केनाप्युत्कर्षजननसंभवेत्रयोप्युत्क
र्षजननार्थस्पर्धयेवाप तंतोरमणीयाः । पाटीरद्रुभुजंगपुंगवमुखोद्भूता वसंतुत्तापिनो वाता वांति श्री॰
दहंति लोचनममी ताम्रारसालद्रुमाः । श्रोत्रे हंत किरति कूजितमिमे हलाहलं कोकिला वा ३३७

लावालमृणालकोमलतनुः प्राणान्कथं रक्षतु। अत्रापित्रयोपिजीवननाशार्थमायं ततोऽरमणी
याः जीवितंमृत्तुनालीरंसंपदःश्वासविभ्रमाः। रामाःक्षणबभारामाशल्यान्येतानिदेहिनां। अत्र
त्रजीविवितादयः स्वाभाव्यानरमणीयाइतिनिःपारापतुमशक्याविशेषणमाहात्म्याच्चार
मणीयाइतिदुःखजनकाश्चातएवलस्तुस्त्याःरमणीयारमणीयशब्दकर्मधारयश्चाश्रीय
तेनेति। शरीरंत्वानजननंरोगोविटमुस्मृतिप्रदः। विपद्वैराग्यजननीत्रयंसुखकरंसतां। श
रीरादयोहिस्वाभाव्यादरमणीयाअपिभेदकमाहात्म्याद्रमणीया। नचरमणीयानांस
मुच्चयेऽरमणीयानांचसमालंकारेणरमणीयारमणीयानांचविषमालंकारेणचसंकी
र्णत्वान्नैतेप्रभेदायुक्ताः समुच्चयस्यप्रभेदताप्रयोजकत्वविरहादन्यथासर्वेषामलंका
राणामनंतभेदत्वापत्तेरितिवाच्यं। समुत्पत्तिःयस्मारमणात्पत्रेपोपरद्दुभुजंगेत्पत्रचस

मालंकारस्याविवक्षितत्वात्॰ नहिहरिचरणनखसंभूतिहरजटनिवासपवित्रनिस्तारसाम्या
संगानांपरस्परंयोगोयोग्यइतिकवेरभिप्रेतं किंतुभगवत्याभागीरथ्याउत्कर्षंजनयितुंत्रयोपि
जागरूकाइतिनापिमलयानिलरसालद्रुमकोकिलकूजितानां। किंतुत्रयोपिबालायाःप्रा
णनाशार्थंकटुपरिकराइति॰ अतएवहंतेतिखेदउपपद्यते। नसमालंकारस्याभिप्रेतत्वेतुत्रया
णांयोगस्ययुक्तत्वात्खेदानुपपत्तिरेवस्यात्। अथबालायामारकन्वितप्रयोगोननुरूपइतिचेत्॰
एवमपित्रयाणांयोगं —— मालंकारस्यासंतमप्रतीतेर्विषमस्यचबाल्यबालांशमादायप्रतिष्ठा
नात्समुच्चयस्यासंकीर्णत्वेवएवंजीवितमृत्युनालीढमीत्यादौजीवितादेरमणीयस्यमत्वाली
ढत्वादिनाश्ररमणीयत्वेपिनमत्वालीढत्वादिकमयुक्तमितिकवेरिहविवक्षितंरमणीयाना
मपिरस्यापत्यस्योत्पत्तिःसिद्धेस्तस्यचस्वाभिलाषितानुगुणत्वाच्चकल्पितत्वप्रयोजकत्वमतः

तृतीयप्रभेदस्यापि न विषमसंकीर्णत्वेनान्यथासिद्धिः एतेन सधीणां सद्योगसदसद्योगे समुच्चयः
प्रभेदद्वा न समविषमसंकरेणान्यथासिद्ध इति रत्नाकरोक्तमयास्तम् इति रसगंगाधरे समुच्चयः अ
थ समाधिः एककारणजन्यस्य कार्यस्याकस्मिककारणांतरसमवधानाहितं सौकर्यं समाधिः तच्च
कार्यस्यानायासेन सिद्धाः सा गसिद्धा च पूर्वापेक्षया विशेषस्तु क एव। उदा॰ आपातेव निशाम
नो मृगदृशामुन्निद्रमातन्वती मानो मे कथमेष संप्रति निरातंके हृदि स्थास्यति। ऊहापोहमि
मं सरोजनयना यावद्विधत्तेंतरां तावत्कामनृपातपत्रसुषमं बिंबं च भासे विधोः। अत्र रात्रिसं
निधानादपि सिद्ध्यतो मानविनाशस्य चंद्रोदयादनायासेन सिद्धिः यथा वा स्मरदीपदीप्तदृ
ष्टिर्धनांधकारेपि पतिगृहं यांत्याः। झगिति प्रादुरभूवन्नस्याः दिवि चंचलाः परितः। इहाकस्मि
केनिःप्रत्यूहपतिःप्रत्यूहपतिगृहपानस्यकारणांतरसमवधानेहेतोरुत्प्रेक्षणादुत्प्रेक्षालं।

र॰गं॰ ३३९ 339 टः पूर्वेक्तस्फुडुानवप्रसंगंदर्पितस्यलोभादंगीकरोतिस्मपदानतांगी ॰ श्लथंतदालिंगनमप्यकस्माद्
नोनिनादैर्धनतांनिनाय अत्रघनध्वनिभिरालिंगनस्यसांगतासिद्धिः पूर्वपद्यद्वयेत्वनायासे
नकार्यसिद्धिः । कथयकथमिवाशाजातांजीवितेमेमलयभुजगवांतावांतिवाताः कृतांता । अत्रप
मपिवतगुंजत्मालिनाकंदमोलोमनसिजमहिमानंमन्यमानोमिलिंदः अत्रजीवितनाशंप्रति
वातवानचंचरीकगुंजितयोरहमहमिकयाहेतुत्वादेकस्याकस्मिकत्वाभावात्रप्रकृतालंकार
स्यविषयः किंतुकर्तृरूपभिन्नधर्मिकयोर्वातगुंजनक्रियपयोः समुच्चयेनजीवितनाशरूपैकका
र्यात्मकैकधर्मिकस्तयोरेवकारणयोःसमुच्चयःसंकीर्णः ॥ इतिरसगंगाधरेसमाधिप्रकरणं
अथप्रत्यनीकंप्रतिपक्षसंबंधिनस्तिरस्कृतिःप्रत्यनीकं । अनीकेनसदृशंप्रत्यनीकंसादृश्य श्री॰ ३३९
स्ययथार्थत्वेनैवसंग्रहेपुनःसादृश्यग्रहणात्गुणीभूतेपिसादृश्येव्ययीभावःलोकेप्रतिप

क्षस्यतिरस्कारायानीकंप्रयुज्यतेतत्तद्दृशक्तोप्रतिपक्षसंबंधितःकस्यचित्तिरस्कारःक्रियतेसचानी
कसदृशतयाप्रयुज्यमानत्वात्प्रत्यनीकमुच्यते। अत्रचप्रतिपक्षगतंबलवत्त्वमात्मगतंदुर्बलत्वंच
गम्यते। संबंधीचतदुपजीव्योपजीवकमित्रादिभेदादनेकविधः। यथा। रे रमनोमममनोभवशास
नस्यपादांबुजद्वयमनारतमानमंतं। किंमांनिपातयसिसंसृतिगर्तमध्येनैतावतातवगमिष्यतिपु
त्रशोकः। जितमौक्तिकसंपदारदानांसहवासेनपरांमुदंधानां। विरसादधरीकरोतिनासामधुना २
साहसशालिमौक्तिकंनोपूर्वत्रोपजीव्यसहृदूपजीवकस्यतिरस्कारोद्दरस्यार्थत्वशाब्दत्वाभ्यां
चवैलक्षण्यं। एवमन्यदप्यूह्यं। अत्रविचार्यतेहेतूत्प्रेक्षायेचगतार्थत्वान्नेदमलंकारांतरंभवितुमर्ह
ति। तत्रद्वितीयोदाहरणेतावद्धेतुत्वांशःशाब्दउत्प्रेक्षांशमात्रमार्थं। प्रथमोदाहरणेतुद्वयमप्यार्थं
पुत्रमारकंसेवकत्वेनकारनवैरस्यतत्सखात्मकमेवागर्तमध्यनिपातनेनकार्येणहेतुना

पाश्च स्फुटं प्रतीतेः अस्मिन्नलंकारे हेतुत्वं निश्चीयमानं हेतूत्प्रेक्षायां तु संभाव्यमानमित्यस्ति विशेष इति
चेत् प्रतीयमानहेतूत्प्रेक्षायामनुत्प्रेक्षात्वापत्तेः वाचकस्येवादेरभावाद्धेतुत्वस्य निश्चीयमानतापा
स्तत्रापि वक्तुमशक्यत्वात्। यस्य किंचिदपकर्तुमक्षमः कायनिग्रहगृहीतविग्रहः कांतवक्त्रसदृ
शाकृतिं कृती राहुरिंदुमधुनापि बाधते॥ इत्यलंकारसर्वस्वकृतोदाहृते प्राचीनपद्येपि भगवद्वैरा
नुबंधादिव भगवद्वक्त्रसदृशमिंदुं राहुर्बाधत इतीतहेतूत्प्रेक्षैव गम्यमाना। मम रूपकीर्तिमहरद्भु
वि यस्तदनुप्रविष्टहृदयेयमिति त्वयि मत्सरादिव निरस्तदयः सुतरां क्षिणोति खलु तां मदनः॥ इ
ति कुवलयानंदकारेणोदाहृते पद्ये हेतूत्प्रेक्षां शंकंते तु भ्रममपि शाकेव्वमिति कथंकार
मस्यालंकारस्योदाहरणं तानीतमिदमापुष्यतेति न विद्मः। प्रतिपक्षगतबलवत्त्वस्यात्मग
तदुर्बलत्वयोः प्रतीतिर्हि हेतूत्प्रेक्षांतरादस्यैव लक्षणं पनैतावता हेतूत्प्रेक्षायाबहिर्भवितुमिद

मीष्ठे·त्वदविनाभावित्वात्· किंतु तत्तदवांतरविशेषीभावतुं न हि पृथिव्यवांतरभेदाद्घटात्पटो विलक्ष
ण इति पृथिव्यावहि भवितीत्युपिवदेति अथ प्रतीपं प्रसिद्धौपम्यवैपरीत्येन चूर्णपमानमौपम्यमेकं प्र
तीयं। तद्वैपरीत्यं च तदुपमानोपमेययोरूपमेयोपमानत्वकल्पनया न तु प्रकरांतरेण· उपमानोपमेययो
रन्यतरस्य किंचिद्गुणप्रयुक्तमद्वितीयतोत्कर्षं परिहर्तुं द्वितीयप्रदर्शतिना ज्ञातस्य मानं साहश्यमप
रं द्विविधं· उपमाने तस्योपमेयत्वान्न्यूनत्वस्य च प्रसंगः फलं· इदमेव चौपम्यस्याविशेषे प्युपमा
लंकाराद्दस्य वैलक्षण्यबीजं· औपम्यप्रतिष्ठानं च निषिध्यमानसाहश्याद्व्यतिरेकात्· नन्वौपम्य
स्योपमेयोपमेयसाधारणेपि पदेकस्याधिक्यमपरस्य न्यूनत्वं गम्यते तत्कस्य हेतोरिति चेत् शृ
णु· उपमाने हि साधारणधर्मसंबंधोन्यूनोपमेये विधीयत इति तावत्त्रिविपादं विभ्रमुवादो च सा
ध्यत्वसिद्धत्वाभ्यां· तेन क्रमेण न्यूनत्वाधिक्ये उपमानोपमेययोः प्रयोजयतः। लोकेपि नि

श्चितविधेयथाप्रजल्पतेतथानाप्रजल्पतेतथानानिश्चितविधइतिस्फुटमेवातेचसाध्यत्वसिद्धत्वेवक्त
विवक्षाधीनेइतिनात्रदोषः।द्वितीयतृतीययोर्भेदयोस्तुफलंस्फुटमेव।चतुर्थस्यतुनिषिध्यमान
वस्तुगतसकलगुणावत्वप्रतिपत्तिः पंचमस्यप्रथामवद्विति· उदा· किंजल्पसिमुग्धिग्ध्नतपाहंतममांग
स्तुवर्णंवर्णमिति।तद्यदिपततिहुताशेतिदाहस्ताशोतवांगवर्णःस्यात्· अत्रपूर्वार्धगतोपमागम्यमु
वर्णवर्णाधिक्यतिरस्कृत्यद्वितीयार्धप्रतीयमानांगवर्णस्याधिक्यंगमयति।हुताशयातंविनाप्र
तीयमपिदुर्लभमुपमानंस्वप्नेपिनसंभवतीतिमुग्धत्वहुताशत्वाभ्यांगम्यते· माहात्म्यस्यपरोऽव
धिर्निजगृहेगंभीरतायाःपितारत्नानामहमेकएवभुवनेकोवापरोमादृशः उक्तेवंपरिकित्यमा
स्मसहसागंवधिकारंगमोऽधाध्वेभवतासमोविजयतोरत्नीधरावल्लभनिभाल्पभूपोनि
जगौरिमाणंमानापमापनंहृदयेविधासीः।ग्रेणाहेपश्यतवांगवर्णंमुग्धेस्तुवविलपोल्लुंठतिउ

पमानकेमर्थस्यतदाहरणमाक्षेपप्रकरणएवगदितं· अमृदप्रमत्तइत्यादि· पंचमोयथा·
करिकुंभतुलामुरोजयोः क्रियमाणांकविभिर्विमृश्यखलैः कथमाश्रितिशृणोपि सादरंविपरीतार्थ
विदांक्रियोषितः अत्रकथंशृणोषीत्यनेनतुल्यैवनसंभवतीतिगम्यते अर्थांतरत्वात्सोप्यमुमेवार्थं
पुष्णाति। तदेवंपवविधंप्रतीयंप्राचामनुरोधान्निरूपितं· वस्तुतस्तावत्त्रात्रयोष्टमयामेषांत
र्गताभेदाः चतुर्थः केषांचिदाक्षेपे पंचमस्त्वनुक्तवैधर्म्यव्यतिरेके। तथाहि। निष्पद्यमानंसुंद
रंवासादृश्यमुपमा। नत्वाद्येप्रतीयेमुखमिवकमलमित्यादौसादृश्यस्यानिष्पन्नत्वात्सौंदर्यंवा
स्तियतोपमातोबहिर्भावःस्यात्सौंदर्यविशेषस्यस्वयाप्यभ्युपगमात्· विशेषस्यसामान्या
निवारकत्वात्· नचप्रसिद्धकमलादिप्रतियोगिकमेवसादृश्यमुपमेतिराजाज्ञास्ति। नचो
पमाविरुद्धवाचिनः प्रतीपशब्दस्यमाहात्म्यादिवत्तादृशंसादृश्यमुपमेतिशंक्यंवक्तुं। उपमा

र.गं. विशेषविरुद्धवाचकत्वेनापितदनुपपत्तेः एवंबंधप्रतीयंप्रसिद्धोपमावदुपमाविशेष एव अत एव द्विती
३४२ यतृतीयावापिभेदावुपमाविशेषावेव। उपमानोपमेययोस्तिरस्कारस्तूपमांतराद्भिन्नलक्षणं प्रयो
342 जयेन्नतूपमासामान्यात् तदनुस्मृतत्वेनैव तत्प्रतीतेः नहिद्राक्षामाधुर्यातिशयेन पार्थिवांतराद्भि
न्नलक्षणेत्वेऽपि तस्य पार्थिवीभवति। अपिच यत्रोपमानोपमेययोस्तिरस्कारोलंकारांतरताप्रयोजक
स्तत्र तिरस्कारोऽपि तथा स्यात् यथा एको विश्वसंतापहरोऽन्यपद्मृणाः प्रारमानहं प्राणिनामित्येवं प
रिचिंत्यमास्मपमनसि व्याधानुतापं कथा भूपानां भवनेषु किंच विमलक्षेत्रेषु गूढाशयाः साधूना
मरयोव संतिकतिन त्वत्तुल्यकक्ष्याः खलाः। अत्रौपम्यप्रदर्शनस्यतोपमानतिरस्कारः फलं
तस्य गर्वितत्वेनाविवक्षणात् किंतु तदनुतापमात्रः एवंच फलत्वेलक्ष्यणोपमात्रेणालंकारां श्री.
तरत्वंचवना अस्याप्यलंकारांतरत्वमसमभ्युपेयं स्यात्प्रतीपषष्ठप्रभेदत्वं वा किंच। त्वद्रुक्मप ३४२

तीयप्रभेदानामपिपरैरस्परवैलक्षण्येनपृथक्पृथगलंकारत्वंस्यात्तत्प्रतीपप्रभेदत्वंप्रतीपस्यष
कलप्रभेदसाधारणसामान्यलक्षणाभावात् अन्यतमलक्षणेतुदूषणसहस्रग्रस्तत्वादलक्ष
णमेवेत्यसक्कदुक्कंउपमालक्षणातुसकलसाधारणं।चतुर्थःप्रभेदस्तुयेषांमतेनाक्षेपस्तेषा
मस्तुनामप्रतीपालंकारःपंचमस्यतुगतिरुक्तैवप्रभेदस्यइतिप्रतीपप्रकरणं अथप्रौढोक्तिः
कस्मिंश्चिदर्थेकिंचिद्धर्मस्तुतातिशयप्रतिपिपादयिषयाप्रसिद्धतद्धर्मवत्तासंसर्गस्योद्भाव
नंप्रौढोक्तिःसंसर्गश्चषन्नसन्नवासाक्षात्परंपरयावा।वल्मीकोदरसंभूतकापिकपिकपिकच्छू
सहोदरः।हापीडयपित्वानिध्रंतिसज्जनानुष्ठदष्टप् अत्रकपिकच्छूसहोदरत्वेनमारकत्वं
नप्राप्नोत्यपितुपीडाजनकत्वमात्रंकवेस्तुपीडाजनपितामारयंतीत्येवंरूपोतिशयोविवक्षितो
तोवल्मीकोदरसंभूतत्वसर्पाधिकरणवृत्तितारूपंकपिकच्छूविशेषणंमारकतावच्छेदक

त्वेनस्वप्रतिभयाववविनाकल्पितं।यथावा· मंथाचलभ्रमणवेगवशंवदायेदुग्धांबुधेरुदपत
न्नणवःसुधायाः।तैरेकतामुपगतैर्विविधौषधीभिर्धाताससर्जतवदेवदयादृगंतान्। अत्रदृगंते
षुनैकेवलंसंजीवनत्वादयोऽमृतमात्रगुणास्तवकवेर्बोधयिषिताअपिषिताअपितुनिखिल
जनवशीकारकत्वादयोऽपीतिसुधाकणौषधीसंसर्गोविशेषणतयातिशयार्थमुपात्तः।
उत्पाद— सादकमावश्यात्रनलोकसिद्धोपितुकविमात्रनिबद्धःयथावा· त्वदंगणसमु
द्भूतासिक्ताकुंकुमवारिभिः त्वदंगतुलनांयातिकदापिलवलीलता। अत्रकेवलायालव
ल्याउपमानताभरसहनसामर्थ्यसिद्धयेनापिकासामानाधिकरण्यकुंकुमजलसंयोगयो
रुपादानंअत्रचधर्मिविशेषसंसर्गादतिशयोधर्मांतरगतोपधायकगुणाविषयस्तद्वेवोपमालं
कारेवाच्यवृत्त्यातत्प्रयुक्तत्वनाभिहितश्चेत्समालंकारस्यैवविषयः यथात्वत्तोजन्महि

र.गं. ३४३

श्री० ३४३

मांशुशेखरतनुज्योत्स्नानिमग्नात्मनोदुग्धांभोनिधिमुधिमुग्धवीचिविकल्पैः साकं परिक्रीडन्नां सं
वासः सुरलोकसिंधुपुलिनेवादः सुधांशोः करैः कस्मान्नोच्चलिमानमंचतितमां देवत्वदीयंयशः
अत्र यशसो धवलतातिशयस्तत्र हेतुर्मिसंबंधप्रयुक्तत्वेन कथित इति तद्देशः समय एवालंकारः। अंत्र
शुक्लकृत्तस्य हेतुत्वं हृक्कृत्तस्य भगवति भगवत्क्रतो राजनीसेव मुन्नरोत्तरमुपचीयमानो राजगतस्त
तुक्त्वात्मोबोक्तेरेव विषयः एवं च शशशृंगधनुर्लीसत्करागगनांभोरुहमालिकावराः तनयैः
सह भाविजन्मनां तव रवेलतिनेरंद्रवैरिणाइत्यादावेकस्य मिथ्यात्वसिद्ध्यर्थं मिथ्याभूतवस्त्वंतरक
ल्पनेमिथ्याध्यवसितारव्यामलंकारांतरमिति नवक्तव्यं। प्रौढोक्त्यैवगतार्थत्वात्। केशाः कलिं
दजातीरतमालस्तोममेचकाइत्यादौ प्राचीनकृतप्रौढोक्त्युदाहरणे यथातमाल्वेषुश्यामलत्वा
तिशयार्थे श्यामत्वाधिकरणीभूतकालिंदीसंबंधउद्भाव्यते तथा वैरिष्ठपिमिथ्यात्वसिद्धै

र०गं० ३४४ येमिथ्यात्वाधिकरणशशशृंगादिसंबंधइत्यस्यापिस्तवकत्वात्·तत्रश्यामत्वातिशयइहतुमिथ्या
त्वमात्रंनतुतस्यातिशयःसिद्ध्यतीतिवैलक्षण्यंतुनवाच्यं·तमालस्तोमप्रमाणान्तरेणासिद्धेपिश्या
344 मत्वकालिंदीसंसर्गोद्भावनंपुनःश्यामत्वसाधनेनातिशयायालमेकमेवस्याद्विषयेतुमिमिथ्या
त्वस्यासिद्धत्वरज्जुशशशृंगादिसंबंधैर्मिथ्यात्वस्यसिद्धिरित्यार्थिसमाजाधीनेयमतिशयसिद्धि
वैलक्षण्येनप्रयोजयतीयत्तुविश्वावशायेतवसत्रजेवहन्नितिकुवलयानंदकृतामिथ्याध्यव
सितेरुदाहरणंनिर्मितं·तत्तुनिदर्शनयैवगतार्थं·निदर्शनागर्भात्रमिथ्याध्यवसितिरितितुनयु
क्तं।मिथ्याध्यवसितेरेवमिथ्यात्वात्ः।यदिवमिथ्याध्यवसितिरलंकारांतरंस्यात्तत्याध्यवसितिर
पितथास्यात्·यथा·हरिश्चंद्रेणसंजप्ताःप्रगीताधर्मतंतुना।खेलंतिनिगमोत्संगेमातर्गंगेमा श्री०
तर्गंगेगुणास्तव।अत्रहरिश्चंद्रयुधिष्ठिरनिगमसंबंधादृगुणानांसत्यत्वंप्रतीयते।एवमध्यस्तु ३४४

धासमुद्रस्यसितामयगृहोदरे।पूर्णेदुविंबेदेवस्यातुंयोग्यास्तावोक्तपः अत्रापि सुधासमुद्रा
दिसंबंधादुक्तिषुमाधुर्यातिशयःप्रतीयमानःकस्यालंकारस्यगोचरःस्यादतोलंकारांतरस्या
न्यमंजुप्रोढोक्त्यैवगतार्थत्वात्तांतावत्तरतिरसंगाधरैःप्रोढोक्तिः अथललितं प्रकृतधर्मि
णिप्रकृतव्यवहारानुल्लेखेननिरूप्यमाणेप्रकृतव्यवहारसंबंधोललितालंकारः आददानः
परद्रव्यंविषंभक्षयसिध्रुवमित्यादिनिदर्शनावारणायतृतीयांतं।अप्रस्तुतप्रशंसावारणाय
प्रकृतधर्मिणीति।यथा।क्ववारामःकामप्रतिभटललंटंतव्यवलस्तवक्कामीवीरश्रेणिशिरसि ला६
धीरामरखभुजां।दिधक्षोस्त्रैलोक्यंप्रलयशिखिनःपद्ममथनप्रगल्भे।प्रालेयैःप्रशमप्रसि
कर्त्तुंव्यवसितः।अत्रप्रकृतेधर्मिणिरावणेपरदत्तपुरोजादिकमस्मंतादेवानामग्रेधीरैःकुं
भकर्णादिभिर्वीरैर्भगवतोरामस्यपराभवमिच्छन्निसिवंकेनरवेणताहताहशेच्छारूपप्र

र·गं·
३४५
345

कृतव्यवहारंविषयमनुक्त्वैवतादृतादृशप्रालेपकरणाक्तनादृशाग्निप्रशमनव्यवसायरूपो
ऽप्रकृतव्यवहारोविषयमुपात्तःविषयोपादानेनतुनिदर्शनैव। यथावा· नान्यास्तिकिंभूमितलेसु
रूपासीतेववाकिंभवतानुरूपा। आकर्षिताचंदनशाखिशाखांप्रबोधितोप्रभवतांफणीं
द्रः अत्रपिरोषवसंबंधिनापिकाहरणाप्रयुक्तेतदीयकोपोद्बोधमनुक्त्वैवचंदनसंबंधिशा
खाकर्षणाप्रयुक्तफणीन्द्रप्रबोधनमुपन्यस्तंनचात्रभेदेऽप्यभेदइत्यतिशयोक्त्यागतार्थेति
वाच्यं· तत्रहिपदार्थेनपदार्थस्यैवाभेदाध्यवसानंकल्पलतायांविराजतेचंद्रइत्यादौदृष्टं
नतुव्यवहारेणव्यवहारस्येत्यविषयए षापमतिशयापोक्तेः। नापिसादृश्यमूलपाऽप्रस्तु
तप्रशंसयाऽधर्मांशेऽप्रस्तुतत्वविरहात नापिनिदर्शनायाः एकधर्माभिगतव्यवहारद्व
योपादानएवतस्याहृष्टेः अतएवोपात्तयोरितितत्लक्षणेविशेषणमुक्तं। एतेचप्रकृतव्य

श्री·
३४५

वहारस्यानुपात्तत्वादलंकारांतरमेव।एवंचकस्तूर्येप्रभेदोवंशःक्वचाल्परिषयामतिःनिती
षिद्वेस्तरंमोहादुहुपेनास्मिसागरमितस्त्रकाव्यप्रकाशकारोपन्निदर्शनामुदहःषीत्तदसं
गतमेवललितस्यावश्याभ्युपगम्यत्वात्रिदर्शनायाश्चत्राप्राषेश्चतद्विलंललितस्याल
कारांतरत्वमुरीकुर्वन्नामाशयः।अन्येतुललितंनालंकारांतरंनिदर्शनयैवगतार्थत्वा
त्।नन्वेकधर्मिगतप्रस्क्तताप्रस्क्तव्यवहारद्वयोपादानजीविनानिदर्शनाकथमप्रस्तु
तव्यवहारमात्रोपादानेपदमाधत्तामितिचेत्।श्रूयतामायुष्मता।इहतावदलंकाराःप्राप
शः।श्रौतार्थाश्चसंभवंति।तत्रश्रौतेभ्यश्चार्थानपृथगलंकारत्वेनगृह्यंतेकिंतुपृथगभे
दत्वेन।तदलंकारसामान्यलक्षणेनक्रोडीकरणात्।इदंपुनर्वाक्यार्थनिदर्शनास्वरूप
व्यवहारद्वयवदुर्म्यभेदप्रतिपादनाक्षिप्तोव्यवहारद्वयाभेदः।तत्रव्यवहारद्वयवदुर्म्य

र०गं० भेदस्य प्रतिपादनं श्रौतमेवापेक्षितमिति न नियमः किं तु प्रतिपादनमात्रं। तच्च परस्परव्यवहारस्य स
३४६ म्मिलतिश्चेदसंचपमित्यत्र व्यवहारद्वयवद्धर्मिणोरभेदस्याश्रुत्या प्रतिपादने इवाधिकपरिष्कृतं तथा
346 प्युषगिलतिश्चेदसंभवमित्यत्रार्थप्रकृतव्यवहारवद्धर्मि श्रौताप्रकृतव्यवहारवद्धर्मिणो
र्थाभेदस्य प्रतिपादनेऽपि वाक्यार्थनिदर्शनात्वमत्रैते। एकत्र श्रौतीत्वमपरत्रार्थीत्वमिति
तु विशेषेण वीर्पत्तौ पदार्थनिदर्शनास्वरूपं तूपमानोपमेयधर्मयोरभेदाध्यवसायमूलउ
पमेयेउपमानधर्मसंबंध इति पृथगेव। एतदुभयान्यतरत्वं च प्राचीनरीत्या सामान्यलक्षणोप
दिष्टं तु ललितं पृथगलंकारः स्यात्तत्सोपमादिरप्युपमादेः पृथक् स्यात्तदुक्तयुक्तेस्तुल्य
त्वात्। न चातिशयोक्तिरेसति रूपक एव विलोपितौ विषयविषयिणोर्द्वयोरप्युपादाने श्रौतं श्री०
रूपकं विषयिमात्रोपादाने त्वार्थमित्यस्यापि सुवचत्वात्। सत्यं। यत्र स्वलंकारशरीरमुभ ३४६

पत्राप्यविलक्षणांतत्रैकालंकारव्यपदेशोयुक्तः यथासादृश्यंनिष्पद्यमानमुपमाशरीरंलुप्तोपमादि
ष्वविलक्षणमेवेतितत्राप्युपमैवेव्यपदेशोन्याय्योनालंकारांतरेणलुप्तत्वपूर्णत्वादिस्तुन
तच्छरीरनिविष्टइतिस्वयंव्यावर्तमानोपिनोपमात्वव्यावर्तकस्तथात्रापीतिस्थितिः। एवंचवि
षयतावच्छेदकरूपेणाभातेविषयोविषयितावच्छेदकावच्छिन्नाभेदस्यरूपकशरीरस्यविष
यतावच्छेदकरूपेणाभासमानविषयात्मकादतिशयोक्तिस्वरूपाद्विलक्षणत्वेनद्वयोरेका
लंकारत्वंनयुक्तं।निदर्शनाललितयोस्तुस्वरूपावैलक्षण्यंप्रदर्शितमेवेत्येकालंकारत्वमे
वेत्याहुः। आहार्यनिश्चयविषयीभूतोविषयेविषय्यभेदोरूपकस्वरूपमुच्यतेननिवेश्यतेवच्छे
दकादिगौरवादेवंचातिशयोक्तेर्भिगीर्याध्यवसानरूपापारूपकभेदत्वमस्तुनामकानोहानिः
एवमपह्नुतेरपि·विषयतावच्छेदकनिह्नवनिगरणानिरूपकस्यैवावान्तरविशेषाइतितुनव्याः।

र॰गं॰
३४७
347

एतन्मतरीत्यातुललितस्यनिदर्शनातःपृथगलंकारत्वंमनोरथललितमेवेति।एवंचतितीर्षुर्दुस्त
रंमोहादुडुपेनास्मितुसागरमित्यत्रनिदर्शनासाधुसंगच्छते।क्वसूर्येत्यादिनास्वमतिसूर्यप्रभव
वंशयोःस्वेतानानुरूपत्वकथनेनात्रयदुडुपकरणकरणकसागरतरणोद्यापारअप्रवृत्तायाःकथ
नेनतादृशमतिकरणकवर्णनेच्छायाःप्रतिपत्तेः।यत्तुअनापिदेशःकच्चमस्त्वयाध्ववसंतमुक्त
स्यदृशांवनस्पतिपथेकत्तमोदेशस्त्वयापरिक्तइतिप्रस्तुतार्थमनुपन्यस्यवसंतमुक्तस्यवन
स्यदृशामनापीतितत्प्रतिबिंबभूतार्थमात्रोपन्यासाल्ललितालंकारइतिकुवलयानंदका
रआह।तत्त्वंतमसंगतं।अत्रकथंनन्वस्यदृशामन्यानंतुशक्यइतिवसंतमुक्तवनदृशांतिःश्री
कतललक्षणामनापीतिहिपर्यवसन्नोऽर्थःतत्रनिश्रीकत्वरूपकार्यद्वाराकारणस्यराजकर्तृ
कस्यागकर्मत्वस्याभिधानंपर्यायोक्तेर्विषयाद्दृशयोरेकत्वाध्यवसानेतुपदार्थनिदर्शनायात्र

श्री॰
३४७

तिशयोक्तेर्वैत्यन्यदेतत्· एवंच पदार्थनिदर्शनोपदृंहितस्य पर्यायोक्तस्यैवात्र विषयो न ललितस्य
किंच तूक्तललितालंकारलक्षणमपि नात्र संभवति· तच्च प्रस्तुतवर्ण्यवाक्यार्थप्रतिबिंबस्य वर्णनं
प्रस्तुते धर्मिणि वर्णनीयं वाक्यार्थमवर्णयित्वा कस्यचिदप्रस्तुतस्य वाक्यार्थस्य वर्णनं ललि
तमित्यादिना ग्रंथेन भवता विवेचितं। इह च प्रस्तुते धर्मिणि देशविशेषे सज्जकर्तृकत्यागकर्मत्व
रूपस्य वर्ण्यस्यार्थस्यावर्णनेथ प्रस्तुतेस्यैव संतकर्तृकत्यागकर्मत्वस्याप्यवर्णनात्कथं सं
गच्छतां यदि पुनरकारि देशः कन्नमस्त्वपाधनिरस्तचंद्रः कठिनाशयेनेति पद्यं स्यात्तदा स्यादपि
तव मनोरथः नवताहृश्शावन दृशा यात्र प्रस्तुतापादेशविशेषवर्णनमस्त्वेवेति वाच्यं· दृशावदे
न तद्दृशासच्छापदर्शनस्य लक्ष्यत्वेन तस्याप्रस्तुतत्वापोगात्· अन्यथा पदार्थनिदर्शनाव्छे
दापत्तेः। एवं रामो विजयते यस्य क्षणात्सामर्षवीक्षणात्तदावाग्निदग्धकांतारली लांस्तं कापु

र॰गं॰ ३४८
348

रीदृशाविसादेर्ललितस्यालंकारांतरतामभ्युपगच्छतामपिमतेनतस्यविषयः किंतुनिदर्शनायाः
अतएवउदयतिविततोर्ध्वरश्मिरज्जावहिमरुचौहिधाम्नियातिचास्तं वहतिगिरिरयंविलंबिघं
टाद्वयपरिवारितवारणेंद्रलीलामितिप्राचांनिदर्शनोदाहरणमपिसंगच्छते॰ तत्ररश्मिर
ज्जुनियंत्रितयोर्घंटयोः। द्वयसंलग्नसूर्यचंद्रोयंगिरिरित्येवंप्रकृतेधर्म्यारूढतयाप्रकृतार्थानुपा
दानाल्ललितमेवस्यात्। प्रकृतव्यवहारस्यलेशतोप्यकीर्तनेकेवलंप्रकरणादिनागम्यत्वेल
लितमन्यथातुनिदर्शनेतिचेत्कसूर्यप्रभवइत्यस्मात्कथंनिदर्शनातर्हिनिर्वानिर्वासितेति
सर्वमसमंजसमेव॥ ॥इतिललितालंकारः॥ अथप्रहर्षणंसाक्षात्तदुद्देश्यकयत्नमंतरे
णाप्यभीष्टार्थस्यलाभःप्रहर्षणं। इदंचसामान्यलक्षणं। त्रिविधंप्रहर्षणसाधारणं। तत्राक
स्मादभीप्सितार्थलाभइत्येकाविधा। वांछितार्थसिद्ध्यर्थंयत्नेक्रियमाणेततोप्यधिकतरार्थ

श्री॰ ३४८

लाभइत्यपरः उपायसिद्ध्यर्थोयत्नात्साक्षात्फलस्यलाभइतितृतीयः अस्यामेवावाप्तिनिरा
सार्थलक्षणोसाक्षादित्युक्तं। क्रमेणरोगदातिरस्कृतोरोषवशात्प्रियजनःप्रियोमृगाक्ष्याशपि
तःपराङ्मुखःकिंमूर्छितोमाचितिकांदिशीकयाकयापिविदांचुम्ब्यविरायसस्वजे। अत्रयत्न
सामान्यशून्यस्यापीष्टलाभः केलीमंदिरमागतस्यशनकैरालीरयास्येंगितेः सुप्तायाःस
रुषःसरोरुहेदृशःसंवीजनंकुर्वतःजानेत्याप्यनभिज्ञयेवकपटव्यामीलिताक्ष्यासखिश्रां
तासीत्यभिधायवक्षसितयापाणिर्मेमाधीयत। अत्रभामिन्यारोषनिवारणाययत्नेक्रियमा
णेरोषनिवारणादप्यधिकतरसुखप्रदः कामुकस्यभामिनीकर्तृकः स्वकरकर्मकस्तत्कुचा
धिकरणकश्चासंगः। नचात्रतृतीयभेदःशंक्यः व्यजनवीजनसमयेकामुकस्यमाननिवार
णस्यैवमुख्योद्देश्यत्वेनतदुपकुचस्पर्शादिफलांतरस्यानुपस्थितः। यथावाल्लोभाहरा

र॰गं॰ ३५० टिकानां विक्रेतुं तत्क्रमनिषामनिशमठं त्वा। लब्धो गोपकिशोर्योमध्ये रथ्यं महेन्द्रनीलमणिः अ
त्र प्रहर्षणाद्वितीयभेदः स्फुट एव। अननुरूपं संबंधमादाय विषमालंकारश्च तत्र महेन्द्रनील
मणिरित्यतिशयोक्त्यालीढयोर्विषयविषयिणोरुभयोरपि प्रहर्षेणाऽनुगुणत्वं वांछिताधि
कार्थत्वस्य मणिभगवदुभयसाधारणत्वात्। विषमे तु नीलपदस्य विषयिमात्रस्य पतौ वरा
टिकार्थिनो यथा महेन्द्रनीलमणेः कोटिमूल्यस्य संसर्गो ननु रूपो न तथा भगवत्संसर्गो भ
वितुं प्रभवति। न चाज्ञानिनां भगवत्संसर्गोऽननुरूप एवेति वाच्यं। एवं तर्हि तत्क्रयविक्रयकर्तृत्वे
नैवाज्ञानित्वलाभे वराटिकालोभरूपहेतूपन्यासस्यानतिप्रयोजनकत्वापत्तेः। यादृशवां
छितसिद्ध्यर्थं यत्नः क्रियते तादृशवांछितसिद्धौ तु समालंकार एव। तदृर्शनोपायविमर्श श्री॰
नार्थमियात तदालीसदनं गतेन। तत्रैव सालक्ष्यत पक्ष्मलाक्षी दाक्षायणीमर्चयितुं प्रया ३५०

तान्नत्र तद्दर्शनोपायसिद्ध्यर्थं प्रयुक्तात्तत्स्त्रीसदनगमनयत्नात्साक्षादेव तद्दर्शनलाभः। यत्तु चात
कस्त्रिचतुरान्पयःकणान्याचते जलधरं पिपासया सोपि पूरयति विश्वमंभसा हंत हंत महतामुदारतेति नि
पद्यं वांछितादधिकार्थस्य संसिद्धिश्च प्रहर्षणमिति प्रहर्षणद्वितीयप्रभेदं लक्षयित्वोदाहृतं कु
वलयानंदप्रकृता· तदसत्। वांछितादधिकार्थस्य संसिद्धिरिति लक्षणे हि पदेन निष्पत्तिमात्रं न
वक्तुं युक्तं। सत्यामपि निष्पत्तौ वांछितुस्तल्लाभकृतसंतोषानतिशये प्रहर्षणशब्दयोगार्थासंग
त्यात् तदलंकारत्वायोगात्· किंतु स्वाभेनकृतः संतोषातिशयः एवं च प्रकृते चातकस्य त्रिचतुरकण
मात्रार्थिता जलदकर्तृकजलकरणकविश्वपूरणेन हर्षाधिक्याभावात्प्रहर्षणं कथंकारं पद
माधत्तां। वांछितादधिकप्रदत्वेन दातुरुत्कर्षमेवं स्फुरणवार्यते। अतएव हंतेत्यादिनार्थांतरन्या
सेन स एव द्योत्यते· लोभाद्वराटिकानामित्यस्मदीयपद्योदाहरणे वांछितुर्वांछितार्थादधि

र.गं.
३५०
350

कवलस्यलाभेनसंतोषाधिक्यात्तद्युक्तं इति प्रहर्षणं। अथ विषादनं अभीष्टार्थविरुद्धलाभो विषा
दनं। अस्य चाभीष्टार्थलाभार्थकारणप्रयोगो यत्र न कृतः केवलमिच्छैव कृता जातश्च विरुद्धार्थ
लाभस्स यत्र चेष्टार्थं प्रयुक्तेपि कारणे न तस्माच्च विरुद्धार्थलाभोपि तु स्वकारणवशात्स च विविक्तो
विषयः यत्र त्विष्टार्थं प्रयुक्तात्कारणादेव विरुद्धार्थलाभस्तत्र तादृशकारणविरुद्धार्थयोरुत्पाद
कोत्पाद्यभावलक्षणासंसर्गस्याननुरूपत्वाद्विषममिष्यमाणाविरुद्धार्थलाभसत्वाच्च विषाद
नमिति संकीर्णतैव एवं चास्य विषमभेदेऽगतार्थतेति नाशंकनीयं· विषमरहितस्याप्येतद्वि
षयस्य दर्शयिष्यमाणत्वात्। यथा। स्वस्त्यव्याहृतिमग्नमानसतया मत्तो निवृत्ते जने चंचूकोटि
निराकृतार्गलतया यास्याम्यहं पंजरात्· एवं कीरवरे मनोरथमयं पीयूषमास्वादयत्यंतः संप्र
विवेश वारणकपकारः फणिग्रामणीः· अत्र हि विषमप्रभेदस्य नास्ति विषयः इष्टार्थका

श्री·
३५०

रणाप्रयोगाभावात्• इष्टार्थप्रयुक्तकारणेन सह विरुद्धार्थस्योत्पाद्योत्पादकभावलक्षणसं
सर्गस्याननुरूपत्वं हि तच्छरीरे। तस्माद्विषादनमेवाप्रस्तुतप्रशंसाघटकेन तयावस्थितं। चे
लांचलेनाननश्रीतरश्मिं संहृत एव तीनी हरिदश्वरीणां॥ गोपांगनानां स्मरजातकंपादं का
उसंपातमपिपापनीवी। अत्रेष्टस्याननगोपनगोपनस्य विरुद्धार्थानीविस्खलनं कारणीभू
तत्रया संघातपरिपंथित्वात्। तच्च सात्विककंपरूपात्स्वकारणाद्देवोत्पन्नं न तु गोपनानुकू
लयत्नात् तेनापीष्टसाधनत्वेन प्रयुक्तात्कारणादिष्टानुत्पत्तिरत्रास्ति। विलांचलाचरणेना
ननगोपनरूपस्येष्टस्योत्पत्तेः अतो विषादनमेवात्र न विषमं। अत्रेदं बोध्यं। इष्टसाधनत्वेन
निश्चितादनिष्टोत्पत्तिरितियो विषमस्य भेदः प्राकृप्रत्ययादिसो नेन विषादनेन ग्रस्तात्वा
दस्येव भेदो भवितुमर्हतीति न विषमस्येति कश्चिद्रूपास्त्वप्रष्टव्यः। न विषमस्येति पद्द्वहुंत

क्तस्य हेतोः विषादनेनैव विषमेणापि कार्यकारणसंसर्गाननुरूपतालक्षणेन गतत्वात्. न
वाऽत्रैकस्यान्यापवादकत्वं युक्तं द्वयोरपि सावकाशत्वात्. भिन्नविषयत्वाच्च. विरुद्धलाभां
शे विषादनस्य. विरुद्धलाभेष्टार्थप्रयुक्तकारणयोः संसर्गाननुरूपतांशे च विषमस्य वि
षयत्वमवोचाम। तस्मात्तत्र किंचिदंशे विषमं किंचिदंशे च विषादनमित्युभयोरपि समावेशो
बोध्यः। अथोल्लासः अन्यदोषप्रयुक्तमन्यस्य गुणदोषयोराधानमुल्लासः तच्च गुणेन गु
णस्य दोषस्य वा दोषेण गुणस्य दोषस्य दोषस्य वेति चतुर्द्धा। आधानं च तद्वत्त्वबुद्धिः। क्र
मेणोदा॰ अलभ्यं सौरभ्यं हरति सततं यः सुमनसां क्षणादेव प्राणानपि विरहशस्त्रक्षतहृ
दां॰ ।त्वदीयानां लीलानां लीलाचलितलहरीणां व्यतिकरात्पुनीते सोऽपि द्रागहह पवमान
स्त्रिभुवनं। अत्र लहरीणां पावनत्वातिशयेन पवमानस्य पावनत्वं गुणान्तरं वर्णितं। विशाला

भ्यामाभ्यां किमिह नयनाभ्यां खलु फलं न याभ्यामालीढा परमरमणीया तव तनुः अयं तु न्यक्कारो
जननि मनुजस्य श्रवणयोर्ययोर्नान्तर्यातस्तव लहरीलीलाकलः अत्र श्रीभारथी रमणीयत्व
गुणेन तद्रूपशब्दविमुखयोर्नयनयोः श्रवणयोश्च नैष्फल्याधिकाररूपो दोषो। यथा वा। हिं
साप्रधानैः खलु पातुधानैर्यानीयता यावनतां सदेव रामां क्षिपो गाद्दशसापि वन्या विंध्यस्य
धन्या समुनेः सतीव। अत्र दोषेणादोषः पूर्वार्धे द्वितीयार्धे तु गुणेन गुण इति विशेष। यथा वा। भूषिता
नि हरेर्भक्तैर्दूषितानि पराङ्मुखैः स्वकुलं नगरं देशो द्वीपं सर्वा च मेदिनी। अत्रोत्तरोत्तरव्यापक
तया तेपि विशेषः श्वपाकानां व्रातैरमितविचिकित्साविचलितैर्विमुक्तानामेकं किल सदनमे
नःपरिषदां। मुदा मामुद्धर्तुं जननि घटयन्त्याः परिकरं तव श्लाघ्यस्त्वगुणः। यथा वा। श्चवहन्निव्या
संगो नियतमथ मिथ्याप्रलपनं कुतर्केष्वभ्यासः सततपरपैशुन्यमननं। अपि श्रावं मामतुपु

र॰गं॰ ३५२ 352

नैवंविधगुणान्वितेत्वत्तो नामक्षणामपि निरीक्षेत वदनं इहापि प्राग्वदेव परंत्तु अंगपस्त इति विशेषः
काव्यलिंगेन गतार्थत्वेनालंकारांतरत्वभूमिमारोहतीत्येके। लौकिकार्थमपत्वान्न लंकार एवे
त्यपरे इत्युल्लासः। अथावज्ञा तद्विपर्ययोवज्ञा॥ तस्योल्लासस्य विपर्ययोऽभावः अन्यस्यान्यस्यान्यदी
यगुणदोषप्रयुक्तगुणदोषाधानानावज्ञेति पर्यवसितोऽर्थः यथा· निष्णातोपि च वेदांते वैराग्यं नैति दु
र्जनः विरंजलनिधौ मग्नो मैनाक इव मार्दवं। अत्र पूर्वार्द्धे प्रपंचानित्यत्वबोधकतारूपवेदांतशास्त्र
गुणप्रयुक्तस्य खले वैराग्यरूपगुणाधानस्योत्तरार्धे द्रवत्वरूपजलनिधिगुणप्रयुक्तस्य मैनाके
मार्दवाविरूपगुणाधानस्य च विपर्ययो वर्णितः मध्येगलं विहरतां गरलं निकामं नागाधिपाः शि
रसि भालतले हुताशः ध्यातो भवज्ज्वलनमध्यगतैस्तथापि तापं तदेव हरते हरते तनुश्रीः अत्र
तापकतारूपगरलादिदोषप्रयुक्तस्य भगवन्मूर्तौ क्रूरत्वादिदोषाधानस्याभावः न चात्रातद्गुण

श्री॰ ३५२

वक्ष्यमाणोलंकारइतिवाच्यंपतोयमुनाजलस्थानहंसोदर्पथायमुनाजलगतधर्ममत्वाग्रहणंनत
थाभगवन्मूर्तगीरत्नादिगतक्रूरत्वाग्रहणंविवक्षितमपितुतादृशक्रूरत्वप्रयुक्तस्यक्रूरत्वांतरस्या
नाविकरणमित्युत्पत्तिविशेषः निस्मातोपीत्यादौतुतद्गुणस्याप्रसक्तिरेव।मद्गुणिमाकुरुविषादम
नादरेणमात्सर्यमंदमनसांसहस्वखलानां।।काव्यारविंदमकरंदमधुव्रतानामास्येषुपास्यसि
सतांविपुलंविलासं।अत्रपूर्वार्धेअनादररूपखलदोषप्रयुक्तस्यकविवाणींविषादरूपदो
षस्यनिषिध्यमानत्वादप्रतिष्ठानेनाभावः शाब्दोवाणीगतरमणीयताद्रूपगुणप्रयुक्तस्यख
लेसंतोषरूपगुणाधानस्याभावः पुनरार्थस्तुभपविधाप्यवज्ञा।उत्तरार्धेतुसंहृदयगुणेनसर
सतारूपेणवाणीपादुल्लासरूपगुणाधानमित्युल्लासएवविशेषोक्तोवगतार्थत्वादवज्ञानालंका
रांतरमित्यपिवदंति।उत्कृष्टगुणविशेषलालसपादोषत्वेनप्रसिद्धस्यापिवस्तुनःप्रार्थनम

र॰गं॰
३५३
353

नुत्ता यथा॰ प्रणिपत्य विधेमवंतमद्धा विनिवद्धांजलिरेकमेव याचे जनुरस्तु कुले कृषीवलानामपि
गोविंदपदारविंदभाजो॰ अत्र हरिभक्तिलालसया कृषीवलकुलजन्मनः प्रार्थनम् एवं दोषविशे
षानुवंधाद्गुणत्वेन प्रसिद्धस्यापि द्वेषात्तिरस्कारः यथा॰ श्रियो मे मा संतु क्षणमपि च माद्यद्गजघ
टामदभ्राम्यद्भृंगावलिमधुरसंगीततुभगाः निमग्नानां यासु द्रविणरसपर्याकुलहृदां सप
र्यासौकर्यं हरिचरणयोरस्तमपते अत्र हरिचरणभजनच्युतिभयाद्राज्यसुखस्य तिरस्कारः
अमुं च तिरस्कारमलक्षयित्वानुज्ञां लक्षयतः कुवलयानंदकृतो विस्मरणमेव शरणं ॥ अन्य
था भवद्भुवनदेहलीमितदुदाहृतपद्ये किमित्यमरसंपदामित्यंशे तिरस्कारस्यापत्तेः ननु कथ
मनयोरलंकारयोः संभवो यावता प्रार्थनमिच्छा तिरस्कारश्च द्वेषः तत्र दोषे इष्टसाधनताज्ञा
नरूपकारणाभावादिच्छा न युक्ता गुणे च द्विष्टसाधनताज्ञानाभावाद्द्वेषोपि तथा वेपरीसं

श्री॰
३५३

तुकारणसत्वादुचितमितिचेत्‌ नैवं दोषगुणयोर्गुणदोषांशमादायेष्टसाधनताज्ञानयोः सत्वा
च्चेदुक्तं कारणं तावद्व्याहन्येत उत्कटद्विष्टाननुबंधीष्टसाधनताज्ञानस्योपायेच्छां प्रति उत्क
टद्विष्टाननुबंधिद्विष्टसाधनताज्ञानस्य चोपायद्वेषप्रतिकारणत्वस्य वाव्यत्वाद्द्वेषपरीत्यमपि
नोचितमन्यथा सुखदुःखोभयसाधनेषु चांद्रायणकलंजभक्षणादिषु हरीतकीदधित्रपु
सभक्षणादिषु वेच्छाद्वेषयोरनियम एव स्यात्‌ अत्र च पुरुषकालप्रवेश आवश्यकः उत्कटतत्पुरु
षीयतात्कालिकद्विष्टाननुबंधितत्पुरुषीयतात्कालिकेच्छाविषयफलसाधनताज्ञानं तत्पुरुषी
योपायेच्छां प्रति कारणं एवमुत्कटतत्पुरुषीयतात्कालिकेष्टाननुबंधितत्पुरुषीयतात्कालिक
द्वेषविषयफलसाधनताज्ञानं तत्पुरुषीयोपायद्वेषं प्रति तेन पुरुषांतरीयं कालांतरीयं च द्विष्टमि
ष्टमादाय न दोषः। इदं तु बोध्यं फले उत्कटे पाठ पापेप्युत्कटेच्छैव जायते एवं फले उत्कटद्वेषेणा

र·गं·
३५४
354

पापेद्वेषएव· एवंफलेउत्कटद्वेषएव· एवंचसुखदुःखोभयसाधनेषुचांद्रायणादिषुपरिस्वसाम
ग्रीवशात्प्रथमंसुखेउत्कटेच्छातदानंसाधनेषुचांद्रायणादिष्वपिसैव· अथस्वसामग्रीवशात्प्र
थमंदुःखेउत्कटद्वेषस्तदाचांद्रायणादिषुसएउत्कटसामग्र्यावलवद्द्वेषत्वकल्पनात· उत्कटत्वं
चप्रकृतेइच्छाद्वेषगतोविषयितविशेषः एकसाधनजन्येइच्छानिष्ठत्वेएककालावच्छेदेनैकत्रो
त्कटेच्छाअपरत्रोत्कटद्वेषश्चनसंभवति· तथासतिचांद्रायणादिष्वेकस्मिन्नेवसमयेइच्छा
द्वेषयोर्द्वयोरप्यापत्तेः। एवंचवलवदनिष्टाननुबंधित्वंवलवदिष्टानुबंधित्वंचोपापेच्छाद्वेषयोः
कारणतावच्छेदकेनदेयमेवत्याहुः। अन्येतु· फलेच्छाफलसाधनताज्ञानयोर्द्वयोरुपाये
च्छांप्रतिफलद्वेषफलसाधनताज्ञानयोरुपायद्वेषंप्रतिचकारणत्वंउत्कटसामग्र्यावलवत्त्वा   श्री·
च्चेष्टानिष्टोभयसाधनेनदोषद्वस्यापिवदंति। एवंचेष्टानिष्टोभयसाधनेदोषगुणेचगुणेनदोष   ३५४

णं च मिश्रिते सहृदयानामिच्छाहेषयो रुचिर्नैवात्मन्ति हरीतकीकदलभक्षणयोरिवेति॥ गुणस्यापि
ष्टसाधनतया दोषत्वेन दोषस्येष्टसाधनतया गुणत्वेन च वर्णनं लेशः यथा· अपि बत गुरुगर्वं मास्म
कस्तूरि यासीरखिलपरिमलानां मौलिना सौरभेण गिरिगहनगुहायां लीनमत्यंतदीनं स्वजन
कममुनैव प्राणहीनं करोषि नैर्गुण्यमेव साधीयो धिगस्तु गुणगौरवं। शाखिनोन्ये विराजंते खंड्यं
ते चंदनद्रुमाः। पूर्वत्र गुणस्य दोषत्वेन वर्णनमात्रमुत्तरत्र तु दोषस्य गुणत्वेन वर्णनमर्थांतरन्या
सानुविद्धं। स्तवलंती स्वलीकदवनितलशोकापल्लतपेजदान्तदग्रं। थौ पदमिविनिवद्धा पुरमिदा·
अपि निर्लोभानामपि मनसि लोभजननयतां गुणग्रामे वांपतवज्जनन्निर्दोषः परिणतः अत्र दोषोऽपराध
स्तथा चापराधवत्त्वेन गुणानां दोषत्वमुक्तं भवति। न चायमलंकारो व्याजस्तुत्या भयरूपयागता
पीइति शंकां। मुख प्रतिपादितार्थवैपरित्येनात्र सर्वत्र पर्यवसानाभावात· न त्वपि बत गुरुगर्वं

र॰गं॰
३५५
355

त्यत्र कस्तूर्याः स्क्तौ कवेस्तात्पर्यमपि तज्जनकत्राणापदारित्वेन निंदायामेव· अत एवाप्रस्तुतक
स्तूरीहन्त्री ताभिव्यक्ते प्रस्तुतहृत्तांते पितस्यामेव विश्रांतिः। एवं नैर्गुण्यमेव व साधीय इत्यन्ये शाख्य
तराणां निंदा न विवक्षिता किंतु स्वलावस्थानं गुणिनः स्वगुणोद्दुखितस्य वाक्यं स्मिन्निर्गुणानां निंदाया
अवक्तव्यत्वात्प्रस्तुतं स्क्तेरेव वाच्यत्वात्· स्खलंती स्वर्लोकादिति पद्ये भागीरथी स्क्ततिप्रकरणापदि
ते पद्यस्ति भागीरथीस्क्तौ तात्पर्यं तदा व्याजस्तुतिरप्यस्तु· तस्याः सावकाशत्वेनैतद्बाधकत्वायो
गात्· रवितुरगादिगाजेषु स्वर्णाचलजलधिधनदकोशेषु· षत्स्वेव राजपुंगव किं दाता स्मीति गर्व
मावहसि। अत्र पर्यंते प्रतीयमानस्य रवितुरगादिपरिसंख्यातपदार्थातिरिक्तसकलवस्तुदा
नरूपस्य गुणस्य दोषत्वेनावर्णनं नत्वेनवर्ण्यमानस्य च रवितुरगाद्यदानस्यागुणत्वाद्गुणदोषयो श्री॰
र्भिन्नविषयत्वेनावस्थानेन लेशस्पर्शलेशरहिता व्याजस्तुतिरिति स्फुटमेव सावकाशत्वं अत ए ३५५

वलेशोपिनव्याजस्तुतेर्बाधकइतिप्रागुक्तंजाह्नवीस्तुतौद्वयोरपिसमावेशः इतिलेशप्रकरणं
स्वगुणत्यागपूर्वकंस्वसंनिहितवस्त्वंतरसंबंधिगुणग्रहणंतद्गुणः यथा· नीतोनासांतिकंत्वा
मालत्याः कुसुमोत्करः बंधूकभावमानिन्येरागेणाधरवर्तिना· यथावा· अधरेणसमागमाद्रदा
नामरुणिम्नापिहितोपिशुक्लभावः हसितेनसितेनपक्ष्मलाक्ष्याः पुनरुल्लासमवापजातपक्षः
। अत्राद्येमालतीकुसुमोत्करस्याधररागरक्ततयाबंधूकभावोपपत्तेस्तद्गुणः द्वितीयेपिपूर्वा
र्धेसस्पष्टएवतद्गुणः परंतृतीयार्धगतेनप्रतिप्रसवतुल्येनहासेनापोद्यमानत्वादुद्गुरः। यदितुहा
सेनाधरसितीकरणद्वारातद्रुणिम्नोबाधस्तदातत्राप्यपरस्तद्गुणः इमंचकेचित्स्वरूपमा
मनंति। यथाप्युल्लासेप्यन्यदीयगुणेनास्यगुणाधानमस्तितथापितत्रान्यदीयगुणप्रयुक्तंगुणां
तरंतूणिदिक्षारताप्रयुक्तहरिद्रोदः शोणत्वमिवाधीयते· अव्यक्तेतुजपाकुसुमलौहित्यस्फटि

र॰गं॰ ३५६ दूसरा 356

कएवान्यदीयगुणएवान्यत्रेतितत्तोस्यभेदः अथातद्गुणः। तद्विपर्ययोतद्गुणः यथा कुचाभ्यामालीढं सहज
कठिनाभ्यामपिस्मिन्काठिन्यं धत्तेत चत्हृदयमत्यंतमृदुलं मृगाणानामेतन्ने ननिनिचसंततोखलुचिरेन
कस्तूरीभवतिनिजसौरभ्यविभवात्· अत्र पृथ्वीर्धेपरगुणाग्रहणेणाद्वस्वगुणात्यागाभावस्त्वार्थः। उ
त्तरार्धगतेदृष्टांतेतुस्वगुणात्यागाभावःशाब्दः परगुणाग्रहणं त्वार्थं· नचापमवज्ञायानातिरिच्यते·
उल्लासविपर्ययोप्यवज्ञातद्गुणविपर्ययश्चातद्गुण इति प्रतियोगीभेदादेवभेदस्यासिद्धेः अत्रगुणा
ग्रहकापेक्षयासंनिहितस्यगुणवतउत्कृष्टत्वसमत्वाभ्यां द्वैविध्यमितिसर्वस्वकारः तस्यापमाश
यः अपकृष्टसंबंधेगुणाग्रहणस्यसाहजिकत्वेनैवचित्राधायकत्वादनलंकारत्वेवसपक्ष
त्वेनतत्तीपविधातुनसंभवतीति अन्येतुअत्रचांतरचमत्कारविशेषस्याभावाद्वैविध्यमपितेतिवदं श्री॰ ३५६
ति। अपरेतुसतिगुणग्रहणहेतावुत्कृष्टगुणवस्तुसन्निधानेतद्गुणग्रहणरूपकार्याभावा

त्यकोपमतद्गुणाविशेषोक्तेरवांतरभेदो न तत्वलंकारांतरीकार्यकारणाभावोनात्रविवक्षितः। किंतु
संनिधानेपितद्गुणाग्रहणाभावः इत्येतावन्मात्रमतोविशेषोक्तेरतद्गुणोभिन्नइतितुनयुक्तं। संनि
धानेपीत्मपिनाविरोधोपिविवक्षितइतिगम्यते। अन्यथाजीवातोरभावादलंकारतैवनस्यात्। स
चकारणाभावाविक्षणोनभवतीतिकथमुच्यतेनविवक्षितइतीत्यप्याहुः। अथमीलितं· स्फुरमु
पलभ्यमानस्यकस्यविद्वस्तुनोलिंगेरीतिसाम्यादिभिन्नत्वेनागृह्यमाणेनावस्त्वंतरलिंगानांस्व
कारणाननुमापकत्वमीलितं। संग्रहश्च· भेदाग्रहेणलिंगानांलिंगैःप्रत्यक्षवस्तुनः अप्रकाशा
त्वनध्यक्षवस्तुनस्तन्निमीलितं। सामान्यवारणायानध्यक्षेति· तत्राध्यक्षस्यैववस्त्वंतरस्याग्र
हणं। तद्गुणेवस्त्वंतरगुणानांभिन्नत्वेनाग्रहणेपिवस्त्वंतरस्याग्रहणमस्त्येवेतिनतत्रप्रसंगः।
उदात्तलक्ष्मीयुमुंभितरसंस्यादिषरस्याःसमानवयेत्यास्ते·नटकुंजगृहस्थुरंतंभगवानेकोमनो

र॰ गं॰
३५७
357

भावो वेद॰ अत्र स्तुरतगमकानां स्वेदकंपनिश्वासानां जलकुंभानयनत्वराजनितैस्तैर्भेदस्याग्रहा
त्स्मरतस्याप्रकाशः। यथावा॰ स्तंभसरूहोरस्मरस्यावधीरितां विंबाधरे मृगाक्षितचवद। वदनेमणि
रदने तांबूलं केन लक्षयेम वयं। अत्र मणितांबूलं कृतो न गृहल्लासीत्युक्ते एतावतसमयं तांबू
लानि मुक्त्वैव समागतास्मीत्युक्तवती प्रतितस्येयमुक्तिः पूर्वोदाहरणे प्रक्षवस्तूलिंगान्यागं
तुकान्यत्र तु साहजिकानीति विशेषः॥ ॥इति मीलितालंकारः अथ सामान्यं। प्रत्यक्ष
विषयस्यापि वस्तुनो विलवत्सजातीयग्रहणाद्वतं तद्भिन्नत्वेनाग्रहणं सामान्यं मीलिते तु नि
गूह्यमानवस्तुन प्रत्यक्षाविषय इति न तत्रातिव्याप्तिः। उदा॰ प स्मिन्हिमानीनिकरावदातेचं
द्रांशुकैवल्यमिव प्रयाते। पुच्छान्त्रयाभ्यां विकलाइ वाद्रौ चरंति ताकासु चिरं चमर्यः। अत्र
चंद्रिकातः पृथक्त्वेन हिमाचलचमरीपुच्छयोरदर्शनादुत्प्रेक्षोत्पत्तिरिति तत्संसामान्य

एम॰
३५७

गुणः। केचित्तु प्रागुक्तलक्षणे भिन्नत्वेनाग्रहणमित्यपहाय विजातीयत्वेनाग्रहणमिति वक्त
व्यं तेन व्यक्तिभेदग्रहेपि सामान्यमेवालंकारः। यथा· स्तवकभरैर्ललिताभिश्चलिताभिर्मंद
मारुतैर्नूपलताभिः। हृतमुपवनमेवासीद्धरिमहिलानां मनस्तवनं भवतः। अत्र महावनमिति महा
वनकार्यस्य निलयनस्य संपादनात्· तच्चैतासां प्रत्यक्षेणात्वदीयैर्मंदैर्लताभिस्सह तत्रव्या
क्तितया भिन्नत्वेनग्रहेपि भिन्नजातीयत्वेनाग्रहणान्निष्पद्यते पूर्वमते तु चालंकारांतरमभ्यु
पेयस्यादित्याहुः· ननु भेदाग्रह एवमीलितसाधारणएकोलंकारोस्तु किमलंकारत्रयेणामी
लिते तावत्प्रकृताप्रकृतधर्मिगुणानां भेदाग्रह उपपादित एव सामान्ये केषांचिद्गुणगुणिभेदा
ग्रहः केषांचित्कचिज्जातिमात्रभेदाग्रहश्च· तद्गुणेपि रक्तगुणे रंजकगुणभेदाग्रहः। न चावां
तरभेदसत्वान्नैकालंकारत्वमुपपद्यत इति वाच्यं· लुप्तोपमादितः पूर्णोपमादे· पृथगलंका

र॰गं॰ रतापत्तेः तस्मादुद्भेदाग्रहस्तत्रयो मीलितादयोवांतरभेदाइतियुक्तं नतुपृथगलंकाराइतिचेत॰ उ
३५८ च्यते। एवंतद्याभेदोप्येकोलंकारस्तदवांतरभेदारूपकपरिणामाद्यतिशयोक्तिप्रमुखाइत्यपि
358 शक्यतेवक्तुं विच्छित्तिभेदस्तुप्रकृतेपितुल्यः॰ यत्तु॰ मीलितरीत्याभेदाग्रहेप्राप्तेकेनविद्धेतुनाभे
दस्फुरणेसतिमीलितप्रतिद्वंद्युन्मीलितं॰ सामान्यरीत्याजातिभेदाग्रहेप्राप्तेकेनविद्धेतुनास
तिवैजात्यग्रहेसामान्यप्रतिद्वंद्विविशेषकंचेत्यलंकारद्वयं॰ यथाहिमाद्रिंत्वद्यशोमग्नं
सुराःशीतेनजानते। लक्षितान्युदितेचंद्रे पद्मानिचमुखानिचेतिकुवलयानंदकृद्द
ह॰ तत्र। अनुमानालंकारेणैवगतार्थत्वादनयोरलंकारांतरत्वायोगात॰ नचात्र
प्रत्यक्षसामग्र्याबलवत्वेनानुमानुमालंकारलक्षणवाक्यगतेनानुमितिपदेनग्रहणा श्री॰
दतएवतत्रास्माभिः पक्षांतरमुक्तं। प्रकृतेचविशेषदर्शनहेतुकस्यप्रत्यक्षस्यैवतथा। ३५८

त्वात्. नहि भ्रमाणां विभाजकानामिवालंकारिकाणामपि सरणिर्य्येन प्रत्यक्षत्वालिंगितामनुमितिं परि
भाषेमहि। न चैवं विधेविषयेनानुमितिपदप्रयोगोभ्युपहितानामितिवाच्यं। तथाप्युथापि प्रकृते प्रति
ष्युन्मीलितादिवत्परिभाषाया अनिवारणात्. अस्तु वा अस्तु वा अनुमितित्वजातियुक्ते वानु
मितिस्तथापि प्रकृते प्रतिबंधकवशान्न सा अनुदयापि तत्करणस्याप्रत्यूहत्वेनानुमानत्वमव्याहतं
। नहि सत्यप्यग्नौ मणिमंत्रादिभिः प्रतिबद्धो दाहो न भवतीति दाहकरणमग्निर्नेति वक्तुं शक्यं। फ
लायोगव्यवच्छेदस्तु न करणतापाः प्रयोजकोपि तु व्यापार एवेति एतेन विशेषदर्शनस्यकोथंतर
भानप्रतिबंधकत्वेन चक्षुःसंयोगादिरूपस्वसामग्रीवशादेवोत्पन्ने तादृश. प्रत्यक्षे हेतुतायां माना
भावात्पारिभाषिक्यप्यत्र नानुमितिरतस्तत्करणमनुमानं कथं नाम स्यादिति पदास्तपदयुक्तं
तद्गुणरीत्यापि भेदानध्यवशाय प्रामाण्यावुन्मीलितं दृश्यते। पश्यात्मद्ध्रगोदहासप्रसरसरसह

र॰गं॰
३५९
३५९

चैरस्तावकीनैर्यशोभिर्धवलिम्नि नीयमाने त्रिजगति परितः श्रीनृसिंहक्षितीन्द्र नेदं यद्यधेषनाभीकमल
परिमलप्रौढिमासादपि ष्यदेवानां नाभविष्यत्कथमपि कमलकार्मुकस्य प्रबोध इति। तदपि न·
। तद्गुणो हि गुणयोर्भेदानध्यवसायो न तु वस्तुनोरिति निर्विवादं। अत्र नाभीकमलपरिमलेन भगव
त्वेन भगवन्त्वानेजातेपि तदीयगुणो नीलिमनि यशोगुणधावल्यभेदानध्यवसायरूपस्य तद्गुण
स्येह दानध्यवसायस्तद्गुणोज्जीवितमित्युच्यते तथाप्यत्र तद्गुणो निर्वाधो भगवतः श्वेतभिन्नत्वेन
ज्ञानस्योपापपशून्यत्वेनापोगात·नवनीलत्वव्याप्यभगवत्त्वज्ञानमेवोपापः। प्राङ्नीलोपि कार
णविशेषमहिम्ना संप्रति श्वेतो जात इति बुद्धेः प्रत्यक्षानुगृहीतापास्तथाप्यनपापात्। अत एव तत्त
द्गुणपजीव्येनालंकारसर्वस्वकृतोन्मीलनविशेषकयोश्चर्चैव न कृता। अतः प्राचीनैः कृतविभा
गेष्वलंकारेष्विदं प्रथमोल्लेखितस्यापावदलंकारस्पष्टाकांतभविः कर्तुं न तावत्स्थगलं श्री॰
३५९

कारत्ववाचोयुक्त्या विगलितभ्रूंस्खलत्वमात्मनोनाटयितुंसंप्रतेमर्यादावशंवदे रायैरिति। यत्तुवेत्रत्व
चातुल्यरुचांवधूनांकणाग्निते गंडतलागतानि। भृंगाःसहेलंपादिनापतिष्यन कोवेदपिष्यन्नेवचं
पकानीत्यत्रस्मर्यमाणमुदाहृत्यकाव्यप्रकाशे निमित्तांतरजनितापिनाभ्रांत्वप्रतीतिः प्रथमप्रतिपन्न
मर्भेदंनव्युदसितुमुत्सहतेप्रतीतस्यत्यागायोगादित्युक्तं। अत्रोत्तरप्रतिपत्त्यातिरस्कृतत्वात्पूर्वप्रति
तेनैवमत्कारित्वं किंचोत्तरप्रतीतेरेवतितपैवव्यपदेशान्याय्यः अन्यथाव्यतिरेकेप्युपमापत्तेः विरो
धाभासस्तु पूर्वोत्तरप्रतीतिद्वयात्मकएतिभवतिचमत्कारीचमत्कारी। अथ[illegible]कारः। प्रथमप्रति
बंधकज्ञानविषयीभूतार्थउक्तः। प्रथमध्यज्ञीपस्ता। भावेनसोविधानात्। साज्ञानविषयेच्छा साचो
त्तरवाक्यादिषयीभूतेज्ञानेजातेनिवर्ततेननुजिज्ञासाज्ञानेष्टसाधनताज्ञानसाध्याज्ञातेहिज्ञाने
ष्टसाधनताज्ञानेतद्रूपस्यैवविषयीभूतज्ञानस्यसिद्धत्वात्कथमुत्पत्तुमर्हतीति। मेवं। किमेकंद

र०गं०
३६०
360

वर्तते लोके इत्यादिप्रश्नवाक्यादेकदेवतत्वव्याप्यधर्मप्रकारकज्ञानमिष्टसाधनमिति ज्ञानजन्याप्रयो
जकगततादृशं ज्ञानं मे जायतामितीच्छानुमीयते सा च प्रष्टुः कुतश्चिद्देवतत्वप्रकारकोपस्थितावेक
संबंधिज्ञानाधीनायां देवतत्व देवतत्वव्याप्यधर्मत्वेन रूपेण तादृशधर्मोपस्थितौ च सत्यां तस्यां
गृहीतेन देवतव्याप्यधर्मप्रकारकज्ञानत्वेन सामान्यतोभाविष्कत्तरवाक्याजन्यज्ञाने इष्टसा
धनताज्ञानादुत्पद्यते तस्याश्च तादृशप्रकारकज्ञानत्वेन च सामान्यरूपेणाविष्णुर्देवतमित्या
दीनि ज्ञानान्येव देवतत्वव्याप्यधर्मांशे निरवच्छिन्नप्रकारताभांजि विषय इति तैरेवोत्तरवाक्या
दुत्पत्तेः सा प्रतिवध्यते जनकीभूतज्ञानं विषय एव तस्या न भवतीति न भवेत् सिद्धिः प्रतिबंधिके ति
न दोषः ॥ तेच्चोत्तरं हि विधेयन्नीतप्रश्नं निबद्धप्रश्नश्च ॥ क्रमेणादात्वामिव पथिकः प्रियोमे विटपिस्तो श्री०
मेषु गमयति क्लेशान् ॥ किमितोन्यत्कुशलं मे संप्रति यत्पांथ जीवामि ॥ अत्र कस्य विस्मांथस्य पु ३६०

रंध्राङ्कं विस्मयिकांतरं प्रत्युत्तरेणातत्वात्रिकः कुशलप्रश्नोत्तु पीयते। कुशलमपृष्टायाः कुशलोक्ति
रयोगात्· किमिति कृशासि कृशोदरि किं तव परकीयवृत्तांतैः कथय तथापि मुदे मम कथयिष्यति
याहि पांथ्य तव जायाः अत्राद्यप्रश्नस्य हेतुश्चेद्दस्ति तदा प्रतिकरिष्यामीति भंग्य·। उत्तरस्य तु नम
यापतिश्चुतया हेतुर्वक्तुं परपुरुषं प्रति योग्यो न च तया प्रपीप्रतिकर्तुं शक्य इति। द्वितीयप्रश्नस्य त्व
लंयातित्रस्पेना विदग्धजनहठमात्रविलसितेन स्वपरसंतोष एव षंसारसार इति। द्वितीयेन्तरस्य तु
यामम दशासेवतव जायाया अपि दशास्ति सैव प्रतिक्रियतां न हि स्वकीयं सदनं दह्यमानमुपेक्ष्य क
श्चित्परसदनाग्निं प्रतिकरोति· अथ यदि परोपकारः स्वकीयां वृत्तिमपि मोद्वाकारणीय इत्यस्ति
मनीषा तदा तवैव च विधोपकारे प्रवृत्तस्य जायायाः केनचिदन्येन भवादृशेनोपकारः करणीय इति
त्वयैव तस्या ममैव परपुरुषपराङ्मुख्या विरहो हरीकर्तव्य इति· उक्तीतप्रश्नस्सहृदुत्तरस्य चारु

र॰गं॰ ३६१ त्वंनिबद्धप्रश्नेतुप्रश्नोत्तरयोरसकृदुपन्यसेतेदितिप्रांचः।अयंचोत्तरालंकारोद्विविधोपिप्रश्नो
त्तरयोरन्यतरस्योभयोश्चसाभिप्रायत्वेननिरभिप्रायत्वेनचचतुर्विधइत्यष्टधाप्रियोस्वदप्रवत्सी
361 मेनमांमुंचतिजातुवित्त।उत्तरेनावकाशोस्तिहृतस्तेमनोरथः।अत्रकेनचित्प्राप्येनकांचित्सा
ध्वीप्रतिकुत्रतवप्रियोस्तीतिकृतःप्रश्नउन्नीतः।प्रियपनैकधेतदुंचनेननतदनेकधेचस्तान्धेना
वयोविलासोमान्मथोभविष्यतीत्यभिप्रायगर्भितः।अन्यथाहृतस्तेमनोरथइत्यस्यासंग
सापत्तेः।उत्तरंतुस्फुटत्वान्नदगर्भितं।स्ववर्णस्यक्षतेतन्निदेशंदेशमपप्रहं।तंस्यदुःप्रापता
हेतोश्चिंताक्रांतंतेमनइतिकस्याश्चित्स्फुटार्थग्रामीणायाःप्रश्नःकस्यचिन्नागरिकस्योत्त
रंरूपंपादद्दासितदाममचिंतागमिष्यतीत्यभिप्रायगर्भं।रोगस्यतेचिकित्सांनिदानमाला श्री॰
च्यसंदर्शयिष्ये।माहृतकातरामूरसक्रियायांनितांतनिपुणोस्मि।अत्रनापृष्टःकस्यचिद्वू ३६१

पादित्यादिनीत्यावेधकत्वेकप्रतिज्ञोन्नीतः प्रश्नो वैधरोगस्य मे चिकित्सां करिष्यसीत्याकारो
विदग्धनायिकारूपापावक्र्या वैशिष्ट्यात्संभोगरूपेणाभिप्रायेणागर्भितः उत्तरमपि तेनैवाभि
प्रायेणागर्भितं। प्रश्नोत्तरयोर्द्वयोरपि निरभिप्रायत्वे त्वमिव पथिक इति कथितमेवोदाहरणं
ऐते त्युन्नीतप्रश्नभेदाः। एवं निबद्धप्रश्नभेदा अप्युहार्याः किमिति त्वं शासीति पद्यमपि
चतुरंगीमिव बहुप्रश्नभेदानामुदाहरणाभावमर्हतीति वक्रवैदग्ध्या वैदग्ध्यव्यवस्थयेति। अत्राहुः। अलं
कारेष्वस्मिन्प्रश्नोत्तरगतमसकृदुपनिबद्धत्वं जीवातुः तथैव चमत्कारोदयात्। तेन सकृत्प्रश्न
स्य सकृदुत्तरं नालंकारस्य भूमिः नवोन्नीतप्रश्नोत्तरेऽव्याप्तिः। उन्नीतस्य प्रश्नस्यैकत्वादनुपनि
बंधात्तदुत्तरस्याप्येकत्वादिति वाच्यं प्रश्नगतमुन्नीतत्वमत्रोत्तरेणाक्षिप्तत्वं न विवक्षितं किं तु प्र
श्नोत्तरपरंपरायां प्राचीनोत्तरश्रवणजन्यत्वमात्रं। यथा। श्यामं ज्ञोपवीतं नव किमिति मषीसंग

र.गं.
३६२
362

गमात्कुत्रजातःसोयंशीतांशुकन्यापयसिकथमभूत्तल्लंकज्जलाक्तं।व्याकुप्यत्क्रूरदीनक्षितिर
मणरिपुक्षोणिभृत्सद्मलाक्षीलक्षाक्षीणाश्रुधारासमुदितसरितांसर्वतःसंगमेन।अत्रकुत्र
जातइत्यादिप्रश्नोमषीसंगमादित्याद्युत्तरस्यावगाद्दुरूतइत्युन्नीतउच्यते·आद्यप्रश्नस्त्वनुन्नी
तोप्युत्तरोत्थापनार्थंनिबद्धइति।एवंचास्मिन्मतेप्रागदर्शितान्युन्नीतप्रश्नोदाहरणान्यनुदा
हरणान्येवाअलंकारस्यास्यद्वैविध्यमपिनप्रश्नस्योन्नीतत्वानिबद्धत्वाभ्यां।किंतून्नीतत्वानुन्नी
तत्वाभ्यांज्ञेयंवस्तुतस्तु।प्रश्नोत्तरयोराकूतगर्भत्वेतावतैवचमत्कारात्त्रासकृदुपादानापेक्षा·
आकूतविरहेत्वसकृदुपादानकृतश्चमत्कारोपेक्ष्यतेनिबद्धप्रश्नोआक्षिप्तप्रश्नेतुप्रश्नाक्षे
पकृतंचमत्कारंयदिमन्यंतेसहृदयास्तदासकृदुपादानेप्यलंकारत्वमस्तु।प्रकारांतरेणाप्य
स्यभेदाःसंभवंति·पद्यांतर्वर्तित्वेनपद्यबहिर्बहिर्वर्तित्वेनतावद्द्वैविध्यंतत्राद्यस्याभिन्नवाक्योर्द्ध

श्री०
३६२

र्णत्वमित्रवाक्याद्धीर्णत्वाभ्यामपुनर्द्वैविध्यं॰ यथांतर्वर्तिनोर्द्वयोरप्युत्तरयोः सकृच्छब्दश्रुतिपर्याप्तत्वेनशब्दावृत्तिपर्याप्तत्वेनानेकेषांप्रश्नानामेकपदनिवेदितोत्तरत्वेनप्रकारांतरैश्चवक्रप्रभेदत्वं।दिङ्मात्रेणोदा॰किंकुर्वतेदरिद्राः कासारवतीधरामनोज्ञतरा॰ कः पावनस्त्रिलोक्यां॰ ॥ ॥

इतिश्रीरसगंगाधरेसमाप्तः जज्जुपनामकगंगारामेणशोधितंलेखितंच॥संवत१८३३

लेरा ३५६

३६३

काव्य रसकौगाधार

॥८३॥

इस्तक मिरंपाठकोपनामक
रामचंद्रशर्मणः॥ पत्राणि ३६२

६५००

